# महावीरस्वामिषट्त्रिंशिका

**आचार्यविजयनेमिसूरीश्वरशिष्यः**
**प्रवर्तकमुनिश्रीयशोविजयः**

अथ स्तोष्ये वीरनाथं वावन्दितगुरुक्रमः ।
छन्दोभिर्विविधैः कैश्चिन् मुग्धलोकप्रबोधकैः ॥१॥
गुणानसंख्याँस्तव वक्तुमीशो मुखैः सहस्रैरपि नोरगेशः ।
किमल्पबुद्धिर्मनुजो ब्रवीतु तथाऽपि भक्त्या मुखरीकृतोऽहम् ॥२॥

अथैकाक्षरपादमुक्तायां **श्रीवृत्तम्**

श्रीश[1] ॥ स्याऽघम् ॥३॥

अथ त्र्यक्षरपादं मध्यायां **मृगीवृत्तम्**

नो जनालीर्मृगी[2] ॥ त्वां विना याति शम् ॥४॥

अथ त्र्यक्षरपादं मध्यायां **नारीवृत्तम्**

लोकास्ते यान्तीश! ॥ ध्यातारो मानारीम्[3] ॥५॥

अथाऽष्टाक्षरपादमनुष्टुभि **समानिकावृत्तम्**

वीर ! ते समानिका[4] च, लोष्टकाञ्चनादिकेषु ॥
दृष्टिराप्त ! दुःखहार ! शान्तये ममाऽस्तु साऽथ ॥६॥

---

१. श्रीः स्यात् । गुश्चेत् ॥ उट्टवणिका यथा - ऽ
२. यत्र रः एव चेत् । सा मता ज्ञैर्मृगी ॥ उट्टवणिका यथा - ऽ । ऽ
३. एको मश्चेन्नारी । छन्दोज्ञैः सा ख्याता ॥ उट्टवणिका यथा - ऽऽऽ
४. पूर्वमेव रो विभाति जस्ततो गुरुर्भवेच्च । लान्तिका समानिकेह कीर्त्तिता बुधाग्रगण्य! ॥ उट्टवणिका यथा - ऽ । ऽ । ऽ । ऽ ।

अथाऽष्टाक्षरपादमनुष्टुभि **विद्युन्मालावृत्तम्**

विद्युंन्मालानाशां लक्ष्मीं, देवेच्छन्ति त्वद्ध्याशून्या ॥
नो ते मर्त्या मोक्षं वीर !, मायामोहे सक्ता यान्ति ॥७॥

अथाऽष्टाक्षरपादमनुष्टुभि **चित्रपदावृत्तम्**

चित्रंपदा तव वाणी शान्तिसुखाय ममाऽस्तु ।
आप्तजनाः कविलोका यामनिशन्तु नुवन्ति ॥८॥

अथ नवाक्षरपादं बृहत्यां **भुजगशिशुभृतावृत्तम्**

तव जिनवर! भक्ता ये न भवति किल तेषां तु ।
शमसुखदद! भीत्यै सा भुजँगशिशुभृता भूमिः ॥९॥

अथ दशाक्षरपादं पङ्क्त्यां **मत्तावृत्तम्**

मत्ता लोका तव न भजन्ति पादाम्भोजं विषयमसारम् ।
मन्वाना ये शुभफलहेतुं ते यान्तीशाऽसुखमिह भूयः ॥१०॥

अथैकादशाक्षरपादं त्रिष्टुभि **स्वागतावृत्तम्**

नाथ! ते पदसरोजमिलिन्दा ये जना भुवि वरा विभयास्ते ॥
लब्धपुण्यभरदेव! सुरेभ्यः स्वागंतानि सुरपूज्य! लभन्ते ॥११॥

---

५. विश्रामः स्यात्पारावारैः सर्वे यत्र ख्याता दीर्घाः । अष्टौ वर्णाः सा शोभाढ्या विज्ञैर्ज्ञेया विद्युन्माला ॥
उट्टवणिका यथा - ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

६. या भगणेन पिनद्धा भेन पुनः प्रविबद्धा । गद्वयतो रमणीया चित्रपदा कथिता सा ॥
उट्टवणिका यथा - ऽ । । ऽ । । ऽ ऽ

७. नगणयुगलसन्नद्धा मगणविततसौन्दर्या । कविकुलकथिता त्वेषा भुजगशिशुभृता ज्ञेया ॥
उट्टवणिका यथा - । । । । । । ऽ ऽ ऽ

८. यस्यां पूर्वं मगणविलासः पश्चात्तस्माद् भगणनिबन्धः । मध्ये सेन प्रविगदिता सा विज्ञैर्मत्ता गुरुरचितान्त्या ॥
उट्टवणिका यथा - ऽ ऽ ऽ ऽ । । । । ऽ ऽ

९. कीर्त्तितेह विबुधै रमणीया स्वागतेति मधुराक्षरबद्धा । रेण नेन सुभगा भगणेन सा गुरुद्वयमनोहरबन्धा ॥
उट्टवणिका यथा - ऽ । ऽ । । । ऽ । । ऽ ऽ

अथैकादशाक्षरपादं त्रिष्टुभि इन्द्रवज्राच्छन्दः

स्तौतीश्वरं वीरविभुं जनोऽथ देवेन्द्रपूज्यक्रमपद्मरागम् ।
यो मानवस्तस्य तु पुण्यभाजो नो इन्द्र[10]वज्रादपि भीतिरस्ति ॥१२॥

अथ द्वादशाक्षरपादं जगत्यां **वंशस्थवृत्तम्**

सदा सुवंश[11]स्थभवैर्जनोत्तमैः प्रपूज्यपादाब्जयुगं मुनीश्वरम् ।
सदा महावीरजिनं जिनेश्वरं स्तवीमि भक्तिप्रसरद्वचोभरैः ॥१३॥

अथ द्वादशाक्षरपादं जगत्यां **प्रियंवदावृत्तम्**

शिवसुखप्रदविभो प्रियंवदो[12]दिविषदो मधुररावकलिताः ।
अथ भजन्ति तमहर्निशमरं भजति यस्तव पदाम्बुजवरम् ॥१४॥

अथ द्वादशाक्षरपादं जगत्यां **प्रमिताक्षरावृत्तम्**

प्रमिताक्ष[13]रान् तव वचोलहरी बहुभक्तितो हृदयतोषकरीम् ॥
बहुलप्रबोधकरवाक्यवरां प्रभजामि तां भवभयापहराम् ॥१५॥

अथ द्वादशाक्षरपादं जगत्यां **प्रभावृत्तम्**

द्युतिपतिशतभासमानद्युते! मुनिवर! भवभीप्रविध्वंसक! ।
जिनवर! तव सा प्रशस्तप्रभा[14] मम शमसुखदाऽस्तु वीतस्पृह! ॥१६॥

---

१०. आदौ तयुग्मेन विराजमाना मध्ये जकारेण विभूषिता या । अन्ते गकारद्वयमण्डिता सा स्यादिन्द्रवज्रा विबुधप्रसिद्धा ॥
उट्टवणिका यथा - ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ

११. गणो जसंज्ञः प्रविभासते पुरस्तकारनामा च परस्ततो भवेत् । ततो जकारो रगणश्च भासते प्रतीहि वंशस्थमिदं महामते!
उट्टवणिका यथा - । ऽ । ऽ ऽ । । ऽ । ऽ । ऽ

१२. प्रथममेव नगणेन संयुता भवति भेन विशदा बुधैर्मता । जगणरञ्जितनिबन्धशोभिता रगणबद्धचरमा प्रियंवदा ॥
उट्टवणिका यथा - । । । ऽ । । । ऽ । ऽ । ऽ

१३. प्रथमं भवेत् सगणबन्धयुता जगणप्रिया सयुगलेन युता ।
भुवि कस्य नैव सुखदाऽभिमता प्रमिताक्षरा बुधगणप्रथिता ॥ उट्टवणिका यथा - । । ऽ । ऽ । । । ऽ । । ऽ

१४. भवति नगणसंयुता नेन या पुनरपि विबुधप्रिया मण्डिता । रगणविरचिता प्रभाह्लादिका स्वरशरविरतीरहद्यान्तिमा ॥
उट्टवणिका यथा - । । । । । । ऽ । ऽ ऽ । ऽ

अथ द्वादशाक्षरपादं जगत्यां **कुसुमविचित्रावृत्तम्**

कुसुमै[१५]र्विचित्रां तव जिन! पूजां विदधति लोका निरुपमभक्त्या ।
अमरवरा ये पदयुगलस्य विदधति सेवां शिवकर! तेषाम् ॥१७॥

अथ त्रयोदशाक्षरपादमतिजगत्या**मतिरुचिरावृत्तम्**

तवाऽनिशं तु सुरवरप्रपूजितोत्तमक्रमप्रविलसदच्छकान्तिका ।
सुखाय मेऽस्त्वै[१६]तिरुचिरा नखावली भवोदधिप्रवरतरिर्जिनेश्वर! ॥१८॥

अथ त्रयोदशाक्षरपादमतिजगत्यां **मृगेन्द्रमुखवृत्तम्**

प्रकुपितमप्यथ भूतले कदाऽपि भवति मृगेन्द्र[१७]मुखं न भीतिदानम् ।
तव चरणाम्बुजभक्तिरक्तचित्तासमशमधाम शरीरिणां यतीन्द्र! ॥१९॥

अथ चतुर्दशाक्षरपादं शक्वर्यां **सिंहोद्धतावृत्तम्** (**वसन्ततिलका**)

नृणां क्रुधोद्धतशरीरविभाविभाजां क्रोधोद्धतद्विपवरस्य विघातने सा ।
सिंहोद्ध[१८]ता भवति यस्य शरीरकान्तिः सिद्धार्थनन्दनजिनः ससुखाय मेऽस्तु ॥२०॥

अथ चतुर्दशाक्षरपादं शक्वर्यां **लोलावृत्तम्**

भव्या यौवनलक्ष्मीर्विद्युद्विभ्रमलोला[१९] विश्वाश्चर्यचरित्रः श्रीवीरोऽतिदुरापः ।
तद्यूयं शमसारं संसारोदधितारं विश्वेशं भजत द्राग् श्रीवीरं जिननागम् ॥२१॥

---

१५. नगणपिनद्धा यगणविनद्धा पुनरपि या स्यान्नगणसुकाम्या । यगणपिनद्धान्तिकपदरम्या बुधगदिता सा कुसुमाविचित्रा उट्टवणिका यथा - । । । । ऽ ऽ । । । । ऽ ऽ

१६. भवेत्पुरो जगणयुता ततः पुनर्मता बुधैरिह भगणेन मण्डिता । ततो भवेत् सजगुरुराजिता वरा चतुर्ग्रहैरतिरुचिरा प्रकीर्त्तिता ॥ उट्टवणिका यथा - । ऽ । ऽ । । । । ऽ । ऽ । ऽ

१७. नगणविराजितपूर्वभागकं यत् भवति ततो जगणस्य यत्र योगः । पुनरपि जेन सरेण मण्डितं तत् सगुरु मृगेन्द्रमुखं बुधैर्विबोध्यम् ॥ उट्टवणिका यथा - । । । । ऽ । । ऽ । ऽ । ऽ ऽ

१८. सेयं तभौ जजगगा मुनिकाश्यपेन सिंहोद्धतेति कथिता मुनिसैतवेन । उद्धर्षिणीति गदिता मधुमाधवीति नागैर्वसन्ततिलका सकलप्रसिद्धा ॥ उट्टवणिका यथा - ऽ ऽ । ऽ । । । ऽ । । ऽ । ऽ ऽ

१९. पूर्वं मस्य निबन्धस्तस्मात्सो विनियोज्यः, मस्तस्मात्परतश्चेत् तस्मात् भस्य निवेशः । अन्ते गद्वययोगो यस्यां विबुधाह्लादी, द्विः सप्तच्छिदि लोला ज्ञेया विज्ञमता सा ॥ उट्टवणिका यथा - ऽ ऽ ऽ । । ऽ ऽ ऽ ऽ ऽ । । ऽ ऽ

अथ पञ्चदशाक्षरपादमतिशक्वर्यां **मालिनीवृत्तम्**

जननमरणवीचिप्राप्तदुःखौघनॄणां पृथुदवथुभवोर्मीमालिनी[२०]ह भ्रमन्तः ।
भवति च शरणं नो वीरनाथं विनाऽन्यः इति विदधतु लोको वीरसेवां सुखालीम् ॥२२॥

अथ पञ्चदशाक्षरपादमतिशक्वर्यां **कामक्रीडावृत्तम्**

कामक्रीडा[२१]मुक्तं शुद्धात्मानं देवैर्वन्द्यं तं सौख्यावासं शुद्धज्ञानं लोकानन्दं नाथं च ।
वीरं धीरं दोषोन्मुक्तं शश्वच्छान्तं सर्वज्ञम् ईशं लोकत्रातारं दीनोद्धारं भक्त्या स्तौमि ॥२३॥

अथ षोडशाक्षरपादमष्ट्यां **गरुडरुतवृत्तम्**

सततमहं जिनेश्वरवरं भवत्रायकं
सकलभयानलोदकसमं सुनामेष्टदम् ।
तव परमं भजामि भुवनैकबन्धो ! विभो !
गरुड[२२]रुतं मदादिभुजगेन्द्रसन्त्रासने ॥२४॥

अथ षोडशाक्षरपादमष्ट्यां **चकितावृत्तम्**

भीमभववनश्रेणीभ्रान्तिक्लान्तिसुचकितो[२३]-
भव्यवरभरा दारिद्र्यप्रोद्भूतमहद्दः ।
इच्छथ लघु चेद् गन्तुं मोहाब्धेरपरतटं
गच्छत शरणं श्रीवीरं भीताभयददनम् ॥२५॥

---

२०. नगणयुगलयुक्ता मेन मध्ये प्रयुक्ता, यगणयुगलनद्धा बद्धमोदप्रबन्धा । इह भवति न केषां हारिणी चित्तवृत्तिर्मधुरपदविलासा मालिनी नागवाहैः ॥ उट्टवणिका यथा - । । । । । । ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ

२१. लीलाखेलं केचित्प्राज्ञाः प्राहुस्तां नृत्यद्वर्णां यां सारङ्गीं वृत्तत्वेन प्राहुर्विज्ञाः केचित्सा । कामक्रीडाख्या ख्याता छन्दोविद्भिश्छन्दोग्रन्थे मैर्बाणैः सौन्दर्याढ्या कस्याऽन्तर्नो मोदं दत्ते ॥ उट्टवणिका यथा - ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ

२२. भवति पुरो नसंज्ञकगणो जसंज्ञकस्ततः भगण इतः परं जगणशोभितः स्यात्तथा । भवति ततस्तसंज्ञकगणो गुरुस्ततः परं गरुडरुतं तदा मनसि भाव्यतां मनोहरम् ॥ उट्टवणिका यथा - । । । । ऽ । ऽ । । । ऽ । ऽ ऽ । ऽ

२३. भाभिधगण एव स्यात् पूर्वं साभिधगणतः यत्र भवति रम्यत्वं तस्मात् स्याद्यदि मगणः । तस्य च रचना तस्मात् तस्माद्यदि नगणः गो यदि गदिता सेयं प्राज्ञैस्तर्हि तु चकिता ॥ उट्टवणिका यथा - ऽ । । । । ऽ ऽ ऽ ऽ ऽ ऽ । । । । ऽ

अथ षोडशाक्षरपादमष्ट्यां **चित्रवृत्तम्**

चित्रै[२४]चित्तवृत्तयो विबाधयन्ति दुःखभेद !
मां विभो ! न विश्वमेतदेव देव ! सारमस्ति ।
त्वत्पदाब्जभक्तिरस्तु चित्तधाम्नि वस्तुतस्तु
नाऽन्यदत्र भूतले लषामि सारवस्तु नाथ ! ॥२६॥

अथ सप्तदशाक्षरपादमत्यष्ट्यां **हरिणीवृत्तम्**

तव पदयुगं ज्ञानोद्रेकप्रदायि भजन्ति ये
भवति तृणवत् संसारोऽयं जिनेन्द्र ! महात्मनाम् ।
चकितहरिणी[२५]नेत्रा वामभ्रुवश्च मनोहरा-
नहि न च धनं तेषां लोभाय वीतरजोहृदाम् ॥२७॥

अथ सप्तदशाक्षरपादमत्यष्ट्यां **पृ[२६]थ्वीवृत्तम्**

महामहिमभासुरार्च्चितसमस्तपृथ्वीश्वरैः
सुदेशनवचोऽमृतैर्जनितचन्द्रमोन्यक्कृतिः ।
विलोचनविभाजितातिचलखञ्जरीटप्रभा
मनो हरति कस्य नो तव मुखप्रभा साऽमला ॥२८॥

अथाऽष्टादशाक्षरपादं धृत्यां **शार्दूलललितवृत्तम्**

बिभ्रन्मोहमृगादिदर्पदलने शार्दूल[२७]ललितम्
कुर्वँल्लोकहृदब्जबोधमनिशं त्वद्वाक्यनिकरः ।
उद्यद्भास्करवत् सुरासुरनराभिस्तव्यचरण !
जीयाद्देव ! महोपकारचतुरो द्राक्षासमरसः ॥२९॥

---

२४. यत्र राभिधो गणः पुरस्ततो जसंज्ञकोऽथ राभिधेन मण्डितो गणेन जस्ततः पुनस्तु । कीर्त्तितो रसंज्ञको गणश्च लान्तिमं बुधेन चित्रसंज्ञमीरितं बुधप्रमोददायकं तत् ॥ उट्टवणिका यथा - ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ ।

२५. नगणसुभगः प्राच्यो भागस्ततस्सगणः पुनः मगणसहितो राख्यस्स्याच्चेत्ततस्सगणो लघुः । गुरुविरचना यस्यामन्त्ये बुधैरिह सा मता भवति विरतिर्यद्वेदाश्वैर्यदा हरिणी तदा ॥ उट्टवणिका यथा - । । । । । ऽ ऽ ऽ ऽ ऽ । ऽ । । ऽ । ऽ

२६. जसंज्ञकगणः पुरो भवति साभिधोऽथो गणः जसंज्ञकगणः पुनर्भवति साभिधोऽनन्तरम् । यसज्ञंकगणान्विता लघुगुरुप्रशस्ताऽन्तिमा वसुग्रहयतिर्बुधैरिहमता तु पृथ्वी वरा ॥ उट्टवणिका यथा - । ऽ । । । ऽ । ऽ । । । ऽ । ऽ ऽ । ऽ

२७. माभिख्यः प्रथमं गणस्सगणसम्भ्राजी यदि ततः जाख्यस्स्याच्च गणस्ततस्सगणसंराजी परमितः । ताख्यश्चेत्तदनन्तरं सगणसम्बन्धो भवति चेत् तर्हि ज्ञैः प्रथितं दिवाकररसैः शार्दूलललितम् ॥ उट्टवणिका यथा - ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ ऽ । । । ऽ

अथाऽष्टादशाक्षरपादं धृत्यां **चित्रलेखावृत्तम्**

ऐन्द्रश्रेणीनतपदयुगला भव्यपापौघभेत्री
कल्याणालीव्रततिविततिवार्दायमाणा मुनीनाम् ।
स्वान्तागारे वसतिमुपगता शान्तिधारां क्षरन्ती
ते मूर्त्तिर्मे भवतु शिवकरी चित्रलेखा[२८] मनोज्ञा ॥३०॥

अथैकोनविंशत्यक्षरपादमतिधृत्यां **मेघविस्फूर्जितावृत्तम्**

श्रयन्ति त्वां देवं गतभवरुजं भक्तिभावोत्तरङ्गाः
सदा मूर्च्छन्मोहव्रजतमसि ये सूर्यभासायमानम् ।
ददन्ते तेषां भीलवमपि च नो स्वप्नकालेऽपि नाथ !
मृगारातीभाद्याः प्रतिभयतमा मेघविस्फूर्जितास्तु[२९] ॥३१॥

अथैकोनविंशत्यक्षरपादमतिधृत्यां **फुल्लदामवृत्तम्**

ये नित्यं श्रीमज्जिनवरवृषभं फुल्लदाम[३०]प्रकाण्डैः
भक्त्यार्च्चन्तीशं विगतभयभरं तीर्थनाथं तु वीरम् ।
तेऽर्च्यन्ते भव्याः सुरवरततिभिः पूर्णकामा अकामाः
स्तुत्या स्तूयन्ते सुरनरवृषभैर्यान्ति मोक्षं च शश्वत् ॥३२॥

अथ विंशत्यक्षरपादं कृत्यां **गीतिकावृत्तम्**

बहुलानुरागसुरासुरार्च्चितपादपङ्कजमादरात्
परिषेवते जिन! यस्तवाऽमलभक्तितो जगतीतले ।
गुणशंसिनी किल तस्य देव ! नरेन्द्रवक्त्रविनिर्गता
भुवनत्रयेऽपि विलासमेति जनस्य नाथ ! सु[३१]गीतिका ॥३३॥

---

२८. मोभो नश्च त्रियगणसहितश्चित्रलेखा तदा स्यात् । उट्टवणिका यथा - ऽ ऽ ऽ ऽ । । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

२९. गणो याख्यः पूर्वं मगणरचना स्यात्परस्तान्मनोज्ञा भवेन्नाख्यो हृद्यो गण इह ततो यस्य बन्धो मनोज्ञः । ररौ स्यातां तस्माद्गुरुरिह यदा तर्हि मान्या बुधेन्द्रैः रसैः षड्भिर्वाहैर्यतिरिह मता मेघविस्फूर्जिताऽसौ । उट्टवणिका यथा – । ऽ ऽ ऽ ऽ ऽ, । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

३०. स्यान्माख्यः पूर्वं तगण इह ततो नेन हृद्यः परस्तात् तस्मात् साख्यश्चेत् रगणसुवलितो रेण नद्धं पुनश्च । तस्माद्गो यस्मिन् विबुधजनगणैः सेवितं सद्गुणाढ्यं ज्ञेयं प्राज्ञैस्तच्छरहयतुरगैः फुल्लदामाभिरामम् ॥ उट्टवणिका यथा - ऽऽऽ ऽऽ। ।।। ।।ऽ ऽ।ऽ ऽ।ऽ ऽ

३१. सजजान्विता भरसाश्रिता लगभूषिता खलु गीतिका ॥ अन्यत्राऽप्युक्तं– वरपाणिशोभिसुवर्णकङ्कणरत्नरज्जुविभूषिता सुपयोधरा पदसङ्गिनूपुररूपकुण्डलमण्डिता । फणिराजपिङ्गलवर्णिता कविसार्थमानसहारिका वरकामिनीव मनोमुदे नहि कस्य सा खलु गीतिका ॥ उट्टवणिका यथा - ।।ऽ ऽ।ऽ ऽ।ऽ ऽ।। ऽ।ऽ ।।ऽ ।ऽ

अथैकविंशत्यक्षरपादं प्रकृत्यां **स्रग्धरावृत्तम्**

कैलासोद्दामकान्तिस्फुरदमलतलन्यस्तचित्रोपलाढ्ये
भव्यस्तोत्रावलीसम्मुखरितककुभि स्वान्तपद्मार्करोचिः ।
नानालङ्कारहारिण्यघदलनकरी वीर ! मूर्त्तिस्त्वदीया
प्रोद्यद्दीप्रप्रभाढ्यामलमणिनिकरैः[32]स्रग्धरा हन्तु पापम् ।।३४।।

अथ द्वाविंशत्यक्षरपादं कृत्यां **मदिरावृत्तम्**

ये मदिरासुहिता मनुजा न भजन्ति तवाऽङ्घ्रिसरोजयुगं
ते जिन! निर्गतपुण्यभरा भयभारसुदुःखितमानसकाः ।
शश्वदशेषशरीरिविशारणकारणचिन्तननद्धहृदो-
नो गणयन्ति परोपकृतिं न विदन्ति गुणं न भजन्ति सुखम् ।।३५।।

अथ चतुर्विंशत्यक्षरचरणं संकृत्यां **दुर्मिलवृत्तम्**

प्रणिधाय भवत्पदपङ्कजमीश ! जिनेन्द्र ! भवामयभेदकरं
ससुरासुरमर्त्त्यनतं सततं परिदुर्म्मिलमोक्षसुखप्रददम् ।
लभते सकलः खलु सौख्यमनन्तमिहाऽपि परत्र च किं बहुना
प्रणतः सकृदप्यमरैः पुरुषः सततं महितो भवति प्रणयात् ।।३६।।

---

३२. लोकैश्छिन्ना त्रिकृत्वो मरभनययैः सुन्दरा स्रग्धरेयम् ।।
अन्यत्राऽप्युक्तं–
कर्णं ताटङ्कयुक्तं वलयमपि सुवर्णं च मञ्जीरयुग्मं पुष्पं गन्धं वहन्ती द्विजगणरुचिरा नूपुरद्वन्द्वयुक्ता ।
शङ्खं हारं दधाना सुललितरसना रूपवत्कुण्डलाभ्यां मुग्धा केषां न चित्तं तरलयति बलात् स्रग्धरा कामिनीव ।।
उट्टवणिका यथा ऽऽऽ ऽ।ऽ - ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

३३. सप्तभकारयुता सगुरुर्गदितेयमुदारतरा मदिरा ।। उट्टवणिका यथा - ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ

३४. सगणौ सगणौ सगणौ सगणौ यदि दुर्म्मिलमेतदवेहि तदा ।।
अन्यत्राऽप्युक्तम्–
विनिधाय करं गुरुरत्नमनोहरबाहुयुगं कुरु रत्नधरं सगणं च ततः कुरु पाणितलं वरपुष्पयुगं विनिधाय गुरुम् ।
इति दुर्म्मिलका फणिनायकसंरचिता किल वर्णविलासपरा चतुराश्रितविंशतिवर्णकृता कविता सुकृताश्रयशिल्पधरा ।।
उट्टवणिका यथा - ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ

अथ चतुर्विंशत्यक्षरचरणं संकृत्यां **किरीटवृत्तम्**

देवकिरीटमणिप्रकरप्रतिरञ्जितपादसरोजयुगं तव
भातु सदा मम चेतसि देवविकीर्णसरोरुहचारि सुखाकर ! ।
यत्र विभाति नखावलिरीश्वर ! पद्ममणिप्रकरप्रतिमाङ्गुलि-
मस्तकराजिसुधाकरबिम्बसमा शमनिर्जितदोषरिपुव्रज ! ॥३७॥

अथ **चण्डवृष्टिप्रपात**नामा सप्तविंशत्यक्षरचरणो **दण्डकः** पठ्यते

जय जय सुरयक्षविद्याधराधीशमर्त्यादिभिः सङ्कुले सर्वशोभाकरे
समवसरणभूमिभागे यथावत्समावेशितानेकलोकाकुलेऽतिप्रभे ।
मणिकनकविचित्रचञ्चत्प्रभाहारिसिंहासनाध्यासिनो देशना देव! ते
त्रिभुवनततकाममोहादिघोरानलोज्झासने चण्डवृष्टिप्रपातायते ॥३८॥

इति श्रीमज्जिनचरणसरोजचञ्चरीकवादिमातङ्गपञ्चाननमहाव्रतपञ्चकविलासगेहतपश्चर्याचरणचक्रवर्त्याचार्यवर्यश्री-
मद्विजयनेमिसूरीश्वरशिष्यप्रवर्तकयशोविजयविरचिता सहृदयकण्ठशोभिनी
वीरोज्ज्वलगुणगुम्फिता विविधनामगर्भच्छन्दोमयमुक्तकषट्त्रिंशिका ॥

॥ इतिश्रीचरमजिनेश्वरश्रीमहावीरस्वामिषट्त्रिंशिका समाप्ता ॥

---

३५. अष्टभकारमनोहरबन्धनवृत्तकिरीटमिदं परिभावय ॥
अन्यत्राऽप्युक्तम्–
पादयुगं कुरु नूपुरसुन्दरमत्र करं वररत्नमनोहरवर्णयुगं कुसुमद्वयसंगतकुण्डलगन्धयुगं समुपाहर ।
पण्डितमण्डलिकाहृतमानसकल्पितसज्जनमौलिरसालयपिङ्गलपन्नगराजनिवेदितवृत्तकिरीटमिदं परिभावय ॥
उट्टवणिका यथा - ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।।

३६. यदि नगणयुगं ततः सप्तरेफास्तदा चण्डवृष्टिप्रपातो मतो दण्डकः ॥
उट्टवणिका यथा - ।।। ।।। ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ

# श्रीभगवन्महावीरचरितम्

**डॉ. आचार्यरामकिशोरमिश्रः**

भगवान् श्रीमहावीरस्त्रिशलातनयो महान् ।
परोपकारी धर्मात्मा जैनधर्मसुधारकः ॥१॥

तपस्वी संयमी धीमान् क्षमाशीलस्त्वहिंसकः ।
सम्यग्ज्ञानी च शुद्धात्मा सम्यग्द्रष्टा सुदर्शनः ॥२॥

सम्यक्चरित्रस्त्वद्वेषी विरागी मोहहारकः ।
अलोभी मदहीनश्च विकारविजयी तथा ॥३॥

'य आत्मा स परमात्मा' ज्ञानमित्थं ददाति यः ।
कृत्वा सत्कर्म नित्यं स संसारेऽस्मिन्महीयते ॥४॥

प्राणिषु प्रभुसन्दर्शी निरहङ्कारवीर्यवान् ।
सर्वाकाङ्क्षाविहीनं तं मनसा वै नमाम्यहम् ॥५॥

अहिंसया च तपसा क्षमया संयमेन च ।
स्वाध्यायेन जीवात्मा शुद्धो भवति सोऽब्रवीत् ॥६॥

आत्माऽस्ति वै नरकस्था वैतरणी नदी सदा ।
सर्वकामकरः सोऽस्ति स्वर्गस्थं नन्दनं वनम् ॥७॥

आत्माऽस्ति कामधेनुः सा सर्वेच्छापूरणी सदा ।
सुखदो भोगदः सोऽस्ति यशस्करोऽपि सर्वदा ॥८॥

नास्ति दयासमो धर्मो न दानं करुणासमम् ।
नास्ति सत्यसमा कीर्तिः शृङ्गारो नास्ति शीलवत् ॥९॥

यस्याऽऽत्मशक्तिः संसारे प्रबला भवतीश्वरी ।
स लोके संकटापन्नो भयभीतो भवेन्नहि ॥१०॥

सर्वमित्रं स सन्मार्गी हितैषी प्राणिनां तथा ।
संयमी च सदाचारी तपस्त्यागरतः सदा ॥११॥

यस्मिन् शूकरक्षेत्रे जातः कविवरतुलसीदासः
आत्मरामहुलसीतनयो यस्तन्नगरे सुनिवासः ।
होतीलालकलावतीसूनू रामकिशोरमिश्र इति,
काव्यकथोपन्यासरचयिता महावीरचरितं लिखति ॥१३॥



# श्रीविष्णुचरितम्

**डॉ. आचार्यरामकिशोरमिश्रः**

शङ्खचक्रगदापद्मधारी विष्णुश्चतुर्भुजः ।
ईशस्त्रिमूर्तिष्वेकः स युष्मान् पातु रमापतिः ॥१॥

समुद्रमन्थनाज्जाता लक्ष्मीर्लब्धा हि विष्णुना ।
धनं ददातु सा प्राज्यं युष्मभ्यं जीवने सदा ॥२॥

भुजङ्गशेषशय्यायां शेते स क्षीरसागरे ।
मालां दधाति कण्ठे यो वक्षसि कौस्तुभं मणिम् ॥३॥

याति गरुडमारुह्य इतस्ततः स सर्वतः ।
भक्तिवशीकृतो भक्तान् रक्षति गरुडध्वजः ॥४॥

दुर्वाससः पदाघातः शोभते यस्य वक्षसि ।
सहिष्णवे च बलिने तस्मै श्रीविष्णवे नमः ॥५॥

रामो भूत्वा च त्रेतायां कौशल्यानन्दवर्धनः ।
लङ्कां गत्वा स कपिभिर्जघान रावणं क्रुधा ॥६॥

द्वापरे चाऽत्र देवक्या गर्भाज्जातः सुदर्शनः ।
वासुदेवः स श्रीकृष्णो हि कंसं जघान मातुलम् ॥७॥

यदा यदा हि धर्मस्य हानिं जानाति माधवः ।
तदा तदाऽवतारं स गृह्णाति धर्मरक्षणे ॥८॥

स सत्योऽस्ति परमात्मा यो वसति सदाऽऽत्मसु ।
स एवाऽस्ति सर्वव्यापी चरेऽचरे कणे कणे ॥९॥

बहूनि यस्य नामानि स्वभुर्नारायणस्तथा ।
दैत्यारिः पुण्डरीकाक्षो वैकुण्ठो विष्टरश्रवाः ॥१०॥

दामोदरो हृषीकेशः केशवो माधवः प्रभुः ।
पीताम्बरोऽच्युतः शाङ्र्गी विष्वक्सेनस्त्रिविक्रमः ॥११॥

पद्मनाभश्चक्रपाणिर्गोविन्दश्च मधोः रिपुः ।
देवकीनन्दनः शौरिः श्रीपतिः कुशलात्मजः ॥१२॥

वनमाली बलिध्वंसी कंसारातिरधोक्षजः ।
रावणारिः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ॥१३॥

इन्द्रानुजाय वै तस्मै नमः समुद्रशायिने ।
उपेन्द्राय मुकुन्दाय नमोऽस्तु चक्रपाणये ॥१४॥

भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी,
काव्यकथोपन्यासरचयिता शूकरक्षेत्रविलासी ।
होतीलालकलावतीसूनू रामकिशोरमिश्र इति,
विद्यावाचस्पतिपदधारी विष्णुचरितं समालिखति ॥१६॥

२९५/१४, पट्टीरामपुरम्, खेकड़ा (बागपत) उ.प्र. २५०१०१
दूरभाषः ०१२१२२३३५२७

# मुक्तक-काव्य-त्रयी

**देवर्षिकलानाथशास्त्री**

[संस्कृतभाषासाहित्यजगतो मूर्धन्यो विद्वान् साहित्यकारः काव्यकलाकुशलश्च श्रीदेवर्षिकलानाथशास्त्रि-महोदयः साहित्यसेवया सुविश्रुतोऽस्ति। राष्ट्रपतिसम्मानितः प्राप्तकालिदाससम्मानश्चाऽसौ विद्वद्वर्योऽधुना जगद्गुरु-रामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालये आधुनिकसंस्कृतपीठस्याऽध्यक्षत्वं, भारतीसंस्कृत-मासपत्रिकायाः प्रधानसम्पादकत्वं च निर्वहति । पुराऽपि चाऽनेन विदुषा राजस्थानसंस्कृतअकादम्या अध्यक्षत्वं राजस्थानशासने संस्कृतशिक्षा-भाषाविभागयोर्निर्देशकत्वं च निर्वोढमस्ति ।]

( १ )

## ईतयो भीतयश्च

प्रतिवर्षं ज्यौतिषिका वर्षफलं घोषयन्ति पञ्चाङ्गैः ।
तस्य हि वर्षस्य च ते भीतीरीतीस्तथा विवृण्वन्ते ॥१॥

अतिवृष्टिरनावृष्टिः, शलभा वा ईतयो निगद्यन्ते ।
भूकम्पा व्युत्पादा भीतिपदैर्नैभिरत्र वर्ण्यन्ते ॥२॥

देशेऽस्मिन् वस्तुतया प्रसृता या ईतयश्च भीतिश्च ।
हन्त ! मनागपि तासां चर्चा क्रियते न दुष्टदैवज्ञैः ॥३॥

### भीतयः

आमूलादाशिखरं प्रशासने, राजनीतिषु, न्याये ।
सर्वत्र प्रसृतोऽयं भ्रष्टाचारो महत्तमा भीतिः ॥४॥

जनसञ्चारसरणिभिर्वार्तापत्रैश्च सूचनाधारैः ।
प्रतिदिनेमेते भ्रष्टाचारा जनसम्मुखं निपात्यन्ते ॥५॥

किन्तु किमपि न क्षीयत एतस्योत्पातवंशवृक्षस्य ।
एतेऽपि क्रीयन्ते तेन हि निभृतं सुवर्णमुद्राभिः ॥६॥

भ्रातृ-पितृव्यादीनमनुचितपक्षग्रहोऽपरा भीतिः ।
जातिजनानामनुचित उपकारोऽस्यैव रूपमस्त्यन्यत् ॥७॥

सत्ताधारिनियज्ञैरनुदिनमिदमेव भारते क्रियते ।
किन्तु न केनाऽप्यद्यावधि विहिताऽस्य ग्रहस्य खलु शान्तिः ॥८॥

## ईतयः

धर्मस्य सम्प्रदायस्य च नाम्ना शान्तिभञ्जनं कर्तुम् ।
आतङ्किनां प्रयोजनमस्त्राणां प्रेषणं प्रकटमीतिः ॥९॥

ईतिरियं देशेऽस्मिन्नेव प्रतितिष्ठतीति न हि सत्यम् ।
अमरीकायां स्फोटैस्तया दर्शितचरश्चमत्कारः ॥१०॥

ईतिरियं केन, कथं, कस्याऽऽदेशात् प्रसार्यते विश्वे ।
जानन्तीदं सर्वे किन्तु मुखं स्यूतमेव रक्षन्ते ॥११॥

स्यूतं किमिति मुखं तैरित्यपि विज्ञायते स्फुटं सर्वैः ।
वोटाख्यलाभलोभो बिभर्ति तत्र प्रधानहेतुत्वम् ॥१२॥

ईतीनां भीतीनामीदृक्षाणां तथैव चाऽन्यासाम् ।
क्रियते नैवोल्लेखो दैवज्ञैर्नाऽपि हन्त पञ्चाङ्गैः ॥१३॥

किन्तु वयं जानीमः प्रमुखो ह्ययमेव देशशत्रुगणः ।
शत्रोरस्य विनाशं कर्तुं सर्वे वयं चिकीर्षामः ॥१४॥

किन्तु न याति विनाशं शत्रुगणः कारणं शृणुत तस्य ।
अस्य गणस्य सुपोषणनिरता किल वर्ततेऽन्नपूर्णैका ॥१५॥

तामपि जानीम वयं वर्तेमहि सपदि जागरूकाश्चेत् ।
देशोऽभ्युदयमुपेयात् तस्या नामाऽस्ति ''राजनीति''रिति ॥१६॥

◈

( २ )

## विश्वकवे रवीन्द्रनाथठाकुरस्य १५०तमजयन्तीमुपलक्ष्य

# जनगणमनसो नेतुर्वाणी

प्राचीजलधितटादरुणाभः कोऽयं रविरुदियाय ?
दिग्वनिता विजहुर्मदतन्द्रां कस्याऽऽलोकलयाय ? ।।१
पुनरथाऽपि मुखरयति माधवनीं दिशमेष रवः ।
विद्यापतिकृतिझंकृतिमनुगुञ्जन्त्येते तरवः ।।२
मृद्वीकामधुरसमधरं कलयन्ती मृदुरणिता ।
केनेयं पुनरपि जयदेवकवेर्वीणा क्वणिता ? ।।३
आप्याययसि धरित्रीमखिलां वाङ्मकरन्दझरेण ।
कोमल-ललित-कान्त-पदगुम्फितकविकृतिपीयूषेण ।।४
रसमनादिमानन्दमुदात्तं वर्षन्ती रमणा ।
रसनामार्द्रयते खलु ते रचना भावप्रवणा ।।५
रतिधृतिशङ्कोत्साहस्मृतिचापल्यहर्षजडताः ।
मानवीयभावास्तस्याः काव्ये भवता कलिताः ।।६
निश्छलहृदया बालाऽसौ तरुणी स्नेहाकुलिता ।
वात्सल्यार्द्रमना मताऽपत्यस्नेही च पिता ।।७
किमप्यपूर्वं भावजगत् सुकवे ! भवता सृष्टम् ।
जीवति वदति चलति पश्यति यत् सहृदयहृदि जुष्टम् ।।८
भवता जलधरसौदामिन्योः प्रेमालापकथाः ।
मूर्छितमानवतायाः क्रन्दनदिग्धा मनोव्यथाः ।।९
यौवनमधुवनवल्लरीषु हृत्कोकिलकलविरुतम् ।
नयनसरित्तीरे विरहिण्याः क्रौञ्च्याः करुणरुतम् ।।१०
सर्वमनादि मानवीयं गाथागीतं पठितम् ।
क्रान्तदर्शिभिर्नयनैरवलोकितमधरैर्गदितम् ।।११
वर्षशतं तव निर्जरकविकीर्त्तेरेको दिवसः ।
भास्करलक्षं जनयेदणुरेकोऽप्येतन्महसः ।।१२
यावद् हिमधवले कैलासे नृत्यति सुरापगा ।
यावत्कालिदासवाणी सुधियां हृदये सुभगा ।।१३

यावन्मनुजो जीवति जगतीमालोकयति रविः ।
यावन्मानवहृदयान्तः स्प्रष्टुं शक्नोति कविः ॥१४
तावद् दिग्दिगन्तगेया गुञ्जिष्यति कल्याणी ।
जनगणमनसो नेतुर्भचतोऽमृतम्भरा वाणी ॥१५

◈

(३)

## अवतरणं कालिदासस्य

(नूत्नकाव्यकल्पना)

आषाढस्य प्रथमदिवसे नीरवेऽस्मिन्निशीथे, पश्यन्नासं कविकुलगुरोर्मेघदूतस्य पङ्क्तीः ।
किं पश्यामि स्तिमितनयनः काव्यनिष्ठे समाधावाविर्भूतः सपदि निकटे कालिदासः स्मितास्यः ॥१॥
हृष्यद्रोमाः प्रमुदितमना आसनं दित्सुरासं सस्नेहं मां कविकुलगुरुः सस्मितं प्रत्यषेधीत् ।
त्वत्प्रश्नानुत्तरयितुमहं सत्वरं त्वामुपेतः, चेज्जिज्ञासुः किमपि, विशदं पृच्छ मामित्युवाच ॥२॥
तस्याऽऽह्वानादुपगतरुचिः प्रष्टुमित्यारभेऽहं, हंहो सूरे ! जगति विदितोऽभूस्त्वमुत्कृष्टकाव्यैः ।
यद् वर्षाणां सहस्रद्वयमतिगमितं स्वर्गते त्वय्यवन्याः, तस्मिन् कुत्राऽप्यधिभुवि कवे! नाऽऽगतस्त्वं कदाऽपि?॥३॥
तूर्णं सोऽयं समुदमवदद् वत्स ! वारान् बहून् वै जातः पृथ्व्यामकरवमहं काव्यकृत्यं तदाऽपि ।
किन्त्वन्ये मां समभिदधिरे नामभेदैर्यतोऽहं, देशे देशे व्यलिखमपरास्वेव भाषासु काव्यम् ॥४॥
जातोऽभूवं सकृदतिगुणे पारसीके प्रदेशे, विज्ञानज्ञोऽप्यलिखमनवद्यासु पद्यासु काव्यम् ।
भाषास्वन्यास्वपि परिगताः काव्यवाचो मदीयाः, ओमरखय्यामिति सुविदितः काव्यकर्ताऽहमासम् ॥५॥
योरोपीयां गिरमपि सकृल्लेखनी मे स्पृशेच्चेद्, गैर्वाणी गीरियमनुभवेदादृतं स्वं कुटुम्बम् ।
तस्मान्मध्येसगरमिटलीनाम्नि देशेऽवतीर्णो दान्तेनाम्ना व्यरचयमहं दिव्य-काम्यप्रबन्धान् ॥६॥
आङ्ग्लानां च प्रखररचनाकोविदानां धरण्यां, जातो नाट्यैः सरसकृतिभिस्तां धरामभ्यसिञ्चम् ।
राज्ये विद्वद्गुणविदि तदा ह्येलिजाबेथराज्ञ्याः ख्यातोऽभूवं बुधसमुदये शेक्स्पियर्नामवाही ॥७॥
इन्द्रप्रस्थे यवनवसुधाधीश्वराणां कवित्वप्रेमा तद्वाक्तिलकरचनाद्याऽत्र मामाचकर्ष ।
नव्यां भङ्गीभणितिरणनासीधुसौरभ्यधारामारात् प्रासारयमुचितवागालिबद्धैः स्वपद्यैः ॥८॥
वाङ्गीं भूमिं तदनु जनुषा संश्रयन् नाट्यकाव्योपन्यासोत्थैर्मसृणशिशिरैर्वाग्जलैरभ्यसिञ्चम् ।
देशे त्वस्मिन् जनगणमनो मह्यमस्निह्यदेव, देशैरन्यैरपि सुरुचिरं श्लाघिता वाङ् मदीया ॥९॥
सुब्रह्मण्यां द्रविडवसुधानन्यदाऽऽश्रित्य चाऽहं, देशस्याऽस्य द्रढिमनि निजां भारतीमन्वयच्छम् ।
वेल्लद्वल्लीततिसुरभिता कैरली भूः कदाचिन्मामाकृष्य स्ववचनरुचाऽभूषयन्मे कवित्वम् ॥१०॥
इत्थं जातः प्रतियुगमहं काव्यकर्ता धरण्यां वर्तेऽथाऽपीत्यभिहितवते स्पष्टतः कालिदासे ।
कुत्राऽद्य स्यादयमिति वितर्कातुरे मय्यकस्मादन्तर्धानं सुकविरगमत्मत्समाधौ हि मग्ने ॥११॥

# अभिराजगलज्जलिका:

**प्रा. अभिराजराजेन्द्रमिश्रः**

## १. नो मया निवेद्यन्ते

न जातु मौकुलयः कोकिलेषु गण्यन्ते
रूपसाम्येऽपि च ते दुःस्वरेण भिद्यन्ते ॥१॥

चारुतां यानि वितन्वन्ति योषिदास्यानां
व्यञ्जने जातु न बिम्बानि तानि कल्प्यन्ते ॥२॥

दन्तयोर्हन्त महिम्ना ययोर्बभौ दन्ती
तरुत्वचो न च ताभ्यां कदापि चर्व्यन्ते ॥३॥

गृहेऽस्ति तस्य हलं काञ्चनं, मयाऽवगतम्
परन्तु मालभुवस्तेन नैव कृष्यन्ते ॥४॥

सन्ति दुःखानि ममाऽप्यङ्ग ! मर्मभिन्दि, परं
यस्य कस्याऽपि पुरो नो मया निवेद्यन्ते ॥५॥

जीवने यद्धि मयाऽऽलोकितं, श्रुतं, सोढम्
ज्ञायते तेन हि किं बन्धवस्समीहन्ते ॥६॥

काममस्माऽस्तु विचारास्पदं तु मद्वृत्तम्
पुरे तु माघवने तान्यहोऽभिनीयन्ते ॥७॥

नृपो न कोऽपि, यशो यस्य दोषधूसरितम्
यशांसि किन्तु कवीनां न जातु जीर्यन्ते ॥८॥

⟐

## २. यो हि तुदादिर्जातः

नैव सहयात्रिसुखं नाऽपि चाऽथ नेत्रसुखम्
यानमपहाय समाजोऽद्य पदातिर्जातः ॥१॥

प्रीतिमाबध्य दृढां हेममृगे लोकोऽयम्
नित्यसुखितोऽपि निजस्याऽलमरातिर्जातः ॥२॥

यौवनं हन्त ! रतिक्षीण एष वार्द्धक्ये
याचमानोऽद्य सुतं को न ययातिर्जातः ? ॥३॥

उत्पथे श्रौतपथाद् ब्राह्मणेऽद्य सञ्जाते
स्वैरमुपवीतबलैः को न द्विजातिर्जातः ? ॥४॥

घृतान्नु भूरिबलीयो जलं, न संशीतिः
यतो हि यज्ञशिखी तेन सुशान्तिर्जातः ॥५॥

तस्य वै धातुगणस्याऽस्तु किं स्वरूपमहो !
पाणिनेः सत्कृपया यो हि तुदादिर्जातः ॥६॥

प्रस्थितशक्तिमदैर्जातु भास्करं स्प्रष्टुम्
तत्फलं पश्य, निपत्याऽद्य सुपातिर्जातः ॥७॥

सुखं स्वपन्तु जनाः सूर्यतापसन्तप्ताः
इतीव नक्तमसाविन्दुरकान्तिर्जातः ॥८॥

यद्वशे हन्त भवेयुस्सखे ! तदाकाङ्क्षाः
साधु जानीहि घटाधाम्नि स निरार्तिर्जातः ॥९॥

◈

## ३. रमा सती सावित्री नारी

धरणीवक्षसि शुष्कविस्तरे
भूत्वाऽऽपगा प्रवहिता नारी ॥१॥

छलच्छद्मषड्यन्त्रनिसर्गे
करुणैका प्रतीयते नारी ॥२॥

शवभूते ब्रह्माण्डपदार्थे
शक्तीभूय समुदिता नारी ॥३॥

शाखामये तरौ प्रतिवृन्तम्
किन्न पुष्पिता फलिता नारी ?? ॥४॥

परमेश्वरमपि गर्भे दधती
तज्जननीत्वसुमहिता नारी ॥५॥

पाषाणे निर्जीवविरूपे
मूर्तीभूय जीविता नारी ॥६॥

कण्ठध्वनौ क्वचिच्छतसंख्ये
लयलहरी समजायत नारी ॥७॥

पुरुषनियतिसूत्रैकधारिणी
रमा सती सावित्री नारी ॥८॥

मामप्यभिराजं या कुरुते
जयति काऽपि राजश्रीर्नारी ॥

## ४. अम्बोपचित्यै

व्यथावल्लकीतन्त्रिकासु प्रहारं
सखे ! मा कृथा दुःखरागोपपत्त्यै ॥१॥

श्रुतं यद् भवेत् कर्णिनी मृत्तिकाऽपि
ततो वच्मि किञ्चित् स्वगेहस्य भित्त्यै ॥२॥

जगत्प्रत्यवायैः परीतं प्रतीतम्
मया जीवनं दत्तमम्बोपचित्यै ॥३॥

तव ध्यानमारम्भणे केन्द्रितं भोः ।
सचिन्तोऽभवं किन्त्वहं कर्मक्लृप्त्यै ॥४॥

अहो स्वार्थहेतोः समेषां प्रयासः
कथं यत्यते नो जनैर्लोकतृप्त्यै ?? ॥५॥

धनी बाणभट्टः कथाऽऽख्यायिकायाः
जिजीवाऽनिशं कोऽपि गोविन्दगीत्यै ॥६॥

धियं वामनीं वामनस्य प्रणौमि
कवित्वात्मता येन दत्ताऽस्ति रीत्यै ॥७॥

अयं वक्ति गङ्गातटस्थां नु दिल्लीम् ।
नमो देशिकायाऽस्य तस्याऽप्यधीत्यै ॥८॥

कृतं रुग्णशय्याशतायुष्यहेम्ना ।
स्पृहा मे दृढा नीरुजेऽद्धास्त्यशीत्यै ॥९॥

◈

# चिति-प्राप्तिः

**डॉ. वासुदेवः पाठकः 'वागर्थः'**

न मे नाममाला, न वर्णेषु बद्धः
निवासश्च नास्ति, न कुत्राऽपि रुद्धः;
न गौरत्वमेव न मे श्यामवर्णः
अरूपस्स्मृतोऽहं सदाऽहं विवर्णः ॥

न मे दीनता नास्ति मे गौरवत्वम्
न मे स्वर्गलोकः न मे रौरवत्वम्;
न गन्तव्यमस्ति निवासश्च नैव
निषेधे समग्रेऽप्यहं सैव सैव ॥

न कृष्णो न रामो न कोऽप्यस्ति देवः
अहं चाऽस्मि सर्वत्र देवाधिदेवः;
गता मे गता मे गता मोहनिद्रा
अहो ! जागृतोऽहं चितिर्मे समग्रा ॥

◈

विवादे विवादे विषादस्य जन्म
विवादे समाप्ते विकासस्य जन्म ।
अतस्सुज्ञलोकैः विचार्यैव कार्या
विषादे विकासे विवेकेन बुद्धिः ॥

३५४, सरस्वतीनगर, अमदावाद-१५
दूरभाषः ०७९-२६७४५७५४

# वीरवियोगः

(भगवतो महावीरस्य निर्वाणाज्जातस्य शोकमयस्य जगतो वर्णनम्)

**आ. श्रीविजयकल्पयशसूरिः***

[१]

न ज्ञातमद्य किं भावि ?

हर्षदोलायां दोलायमाना, आनन्दसरसि रममाणा, मेघध्वनेरप्यधिकतरां गम्भीरां प्रभोर्मुखतन्त्रे वहन्तीं मधुरां वचनावलीं भव्यात्मानः शृण्वन्तः आसन् ।

तत्र ह्यविरतं षष्ठिमुहूर्त्तपर्यन्तं यावद् वाणीसुधां सिञ्चन् त्रिजगद्दीपकः पृथ्वीमण्डलाधिपतिः-करुणासिन्धुः-कृपावतारः परमात्मा श्रीमहावीरस्वामी स्वपार्थिवदेहं त्यक्त्वाऽतिदूरमगोचरस्थानं गतः ।

चतुर्दशलोकाग्रस्थाने चिरकालायाऽगच्छदात्मोद्धारक इति ज्ञात्वा सर्वेषां हृदयानि वज्रघातेन हतानीव जातानि ।

सर्वे निःशब्दाः शोकमग्नाश्च बभूवुः । अमावस्यारजन्यतीव श्यामला जाता, हास्यं विकिरन्ति तारकाणि स्ववक्त्रं प्रच्छन्नीकर्तुं मेघानप्युल्लङ्घ्य दूरं गतानि, यस्याऽऽननदीप्तिं गृहीत्वा कुमुदानि विकस्वराणि भवन्ति स चन्द्रमा व्योम्न्यगोचरोऽभवत् ।

स्फुरन्त्या निशादेव्याः स्फुरद्यौवनस्य किलकिलं तिरोऽभूत्, तदङ्के लीनीभवनाय न कोऽपि सज्जीबभूव । सर्वेषां जन्तूनां साहाय्यं कर्तुं जातेव गगनगङ्गाऽपि वारिरहिताऽभूत् । अम्बरोद्यानस्य तारककुसुमानि म्लानीभूय त्रस्तानीव तिरोऽभवन् । व्योमरूपलक्ष्म्याः सूर्यचन्द्ररूपकुण्डले इव शोभावर्धकः पृथ्वीरूपश्रियः कण्ठाभरणस्य देदीप्यमानो मध्यमणिरदृश्योऽभवत् ।

[२]

निशापतिरपि ज्योत्सनास्मितविकिरणेऽप्रभुर्बभूव, तदा विहगसमूहोऽपि स्वनीडे प्रच्छन्नीभूतः, दुःखार्त्ताः सन्तस्ते पक्षिगणा नभोमण्डले विहर्तुमक्षमा जाता इव भ्रमन्तो नाऽदृश्यन्त ।

दुःखपीडिताः पशवोऽप्यक्षिभिरश्रूणि पातयन्तोऽदृश्यन्त, निश्चलभूतानि पर्णानि निजदेहं चालयितुमक्षमाण्यभवन् ।

---

* आचार्यश्रीविजयलब्धि-विक्रम-स्थूलभद्रसूरिपट्टालङ्कारः

समीरः स्तब्ध आसीत् । यतोऽस्या धराया भास्कर-शशिनौ युगपदस्तं गताविव जातौ ।

हे त्रिभुवननाथ ! रे त्रिलोकगुरो ! हे सकलजनवन्द्य ! हे देवेन्द्रवन्दित ! हे नर-नरेन्द्रपूजित ! हे सकलजनहितचिन्तक ! अये प्रभो ! मम नाथ ! भवतेदं किं कृतम् ?

कोऽस्मादृशान् प्राणिनः पवित्रीकरिष्यति ? आत्मारामे स्फुरितगुणपुष्पाणि लुञ्चितुमुद्यतान् कर्मशलभान् को दूरीकष्यिति ?

हे अशरणशरण्य ! अनादिकालात् भववने भ्रमतोऽस्मादृशान् क्रोधादिवन्यपशुभ्यः को रक्षिष्यति ?

भो नाविक ! भवाब्धिमध्ये मम नावं कस्तारयिष्यत्यधुना ?

हे रक्षणकारक ! विषयलुण्टाकैर्लुप्यमानमात्मधनं को रक्षिष्यति ?

भो दीपक ! मुक्तिसदनं प्रति गमनोद्यतं मिथ्यात्वतमसा संसारगर्तायां पतन्तं मां ज्ञानदीपेन को वारयिष्यति ?

रे विधातः ! त्वयेदं किं चिन्तितं ? बुभुक्षिताय घृतमिश्रितं मिष्टान्नं दत्वाऽऽकृष्टं ? भवतो मयैतादृशः कोऽपराधः कृतो येनाऽहं दूरीकृतः ?

हे सूर्यदेव ! किं तव प्रतापेऽल्पताऽऽगता यदस्माकं स्वामिनस्तेजोपहृतम् ?

[३]

हे चन्द्र ! किं तव सौम्यता नष्टा ? यदस्माकं सौम्यनिधिः परमात्मा हृतः । हे चन्द्र ! किं तव शीतलताऽग्नौ दग्धा ? यदस्माकं शीतोदधिस्त्वया धृतः ?

हे पद्म ! किं तव सुगन्धो नष्टो यदस्माकं पुष्पाङ्गिनः श्वाससुरभिः गृहीतः ?

हे सागर ! किं तव गाम्भीर्यं कलङ्कितं यद् गाम्भीर्याद्यनेकगुणालङ्कृतस्याऽस्मन्महोपकारिणो दर्शनं दुर्लभं कृतम् ?

हे शिववधु ! अनन्तजनैर्विवाहितयाऽप्यस्मन्निस्तारकं विना क्षणमपि धीरता न धारिता ?

भो सार्थवाह ! हे प्रभो ! आगच्छ आगच्छ, हृदयगिरौ वासं कुरु कुरु । मनोमन्दिरे तिष्ठ तिष्ठ। मुक्तेर्निर्मलपथं दर्शय दर्शय । हे दयानिधे ! कृपां कुरु दयां कुरुं, दयां कुरु ।

मत्सदृशस्य बालकस्य नम्रां विज्ञप्तिं शृणु शृणु । निर्बन्धं गृह्यतां गृह्यतां, अथ त्वां न मुञ्चामि न मुञ्चामि न त्यजामि, न त्यजामि ।

C/o. सोहनराजजी तालेडा
महेन्द्र ज्वेलर्स
पीलप्पालेन, चंपकहाउस २४/२
नगरथपेट,
बेंग्लोर ५६०००२

आस्वादः

# विज्ञानस्याऽपि यत्राऽज्ञानम्

## सार्वदिकं --- सार्वकालिकम्

**मुनिकल्याणकीर्तिविजयः**

ऐसवीये १९७७तमे संवति रोनाल्ड-डंकनः वेस्टन-स्मिथश्चेत्याख्यौ द्वावमेरिकीयलेखकौ 'अज्ञानस्य विश्वकोशः' (The Encyclopaedia of Ignorance) इत्यभिधं ग्रन्थं प्रकाशितवन्तौ । तत्र ग्रन्थे ताभ्यां मनुजजातेर्ज्ञानस्य विषयत्वमभजन्तः पदार्थाः सङ्गृहीताः सन्ति, यथा - डायनोसोर्-जीवाः कथं विनष्टाः ?, प्लुटोग्रहानन्तरं X -ग्रहस्याऽस्तित्वं समस्ति न वा ?, मनुष्यस्य जनीनरचनायां (Genetic Blue print) कति रङ्गसूत्राणि (genes) सन्ति ?, अस्माकं सूर्यमालावत् कति अन्याः सूर्यमाला ब्रह्माण्डे विद्यन्ते ?- इत्यादयः । एते सर्वेऽपि प्रश्ना लेखकाभ्यां वैज्ञानिकपूर्वभूमिकया सह प्रस्तुताः सन्ति, सहैव प्रत्येकं प्रश्नोऽनुत्तर एवाऽस्तीत्यपि लिखितम् ।

एतत्पुस्तकप्रकाशनानन्तरमद्य प्रायः पञ्चत्रिंशद् वर्षाणि व्यतीतानि । एतावता विज्ञानेन महती प्रगतिः साधिताऽस्ति । विविधविषयकं पूर्वतनमज्ञानं संशोधनैर्नवनवैश्चाऽऽविष्कारैरद्य ज्ञानसीम्नि प्रविष्टमस्ति । अतः पूर्वोक्ताः प्रश्ना अद्याऽनुत्तरिता नैव सन्ति । यथा — डायनोसोर्-जीवा उल्कापाताद् धूमकेतुपाताद् वा विनाशं प्राप्ताः, प्लुटोग्रहानन्तरं X ग्रहो नास्ति किन्तु केचन वामनग्रहाः (dwarf planets) सन्ति, मनुष्यस्य जनीनरचनायां ३०,६००-सङ्ख्याकानि रङ्ग-सूत्राणि सन्ति, बाह्यावकाशे बहुत्र बह्व्यः सूर्य-मालाः विद्यन्ते — इत्यादि ज्ञानमद्य सर्वसामान्यत्वं भजति । फलतः सिद्धमेतद् भवति यत् पूर्वोक्ताः प्रश्ना अन्ये च तादृशाः प्रश्नाः 'अज्ञानस्य विश्वकोशे' समावेशं प्राप्तुं नैवाऽर्हन्ति ।

> मनुष्येणाऽसङ्ख्यैः संशोधनैः प्रकृतेः सङ्ख्यातीतानि रहस्यानि अनावृतानि, ज्ञानकोशश्च समृद्धीकृतः । तथाऽपि विविधकारणजातैः कानिचन रहस्यान्यावृतान्येव सन्ति । तेषामुद्घाटनं सर्वथाऽशक्यम् ।

एषा सिद्धिर्ह्यवश्यं विस्मयावहाऽस्ति, यतोऽरण्ये वसत आदिमानवस्य मस्तिष्कं मुख्यवृत्त्या स्वीयावस्थानार्थं (survival) विकसितमस्ति । मस्तिष्कस्य दलप्रमाणं ज्ञानतन्तुजालमपि च मूलत एतदर्थमेव विकासं प्राप्तम् । एवंस्थिते परमाणोरारभ्य विशालब्रह्माण्डं यावद् सङ्ख्यातीतानां विषयाणां विचारणं तु तत्कृते विस्मयावहमेव स्यान्ननु ।

अथ, तथाऽपि केचन विषयास्तादृशा अपि सन्ति ये अद्याऽपि अज्ञानसीमानमुल्लङ्घितुमशक्ताः सन्तो विज्ञानक्षेत्रमप्राप्ता एव । के ते विषयाः - इति जिज्ञासायाः शमनात् पूर्वमज्ञानस्य द्वौ भेदौ विचारयामस्तावत् प्रथमम् ।

यस्य कस्यचिद् विषयस्य रहस्यं कल्पितुमवगन्तुं वाऽस्माभिर्यदि प्रयत्न एव न कृतः स्यात् कदाऽपि, तदा तद्विषयकमज्ञानमेवाऽस्माकं भवेत् । यथा, चिम्पान्झी वानरः कदाऽपि तज्ज्ञातुं नैव प्रयतते यन्महास्फोटेन (Big Bang) ब्रह्माण्डस्याऽऽविष्कारः कथं जातः - इति । यतः स ब्रह्माण्डं नाम किमित्येव न जानाति । एषोऽस्त्यज्ञानस्य प्रथमो भेदः । अत्र प्रकरणे तादृशस्याऽज्ञानस्य विचारणं नास्ति किन्तु येषां विषये बहुभिर्बहुशो विचारणं कृतं स्यादथाऽपि तेषां रहस्यं न कदाऽप्यवगतं नाऽपि कदाचिदवगमिष्यते च तादृशस्याऽज्ञानस्य विचारणमस्ति । कानिचनैवोदाहरणानि विचारयामः —

**१. अस्माकमाकाशगङ्गायां ( Galaxy ) यः केन्द्रस्थित कृष्णगर्तो ( Black hole ) विद्यते तस्य साक्षात्कारं कर्तुं वयं सर्वथाऽसमर्थाः** यतः ---- स गर्तो घनावरणान्तरितो वर्तते । विस्तरेण विचारयामस्तावत् — विराटस्याऽस्य कृष्णगर्तस्य दलमानं खगोलविदामभिप्रायेण पञ्चविंशतिलक्षसूर्याणां दलमानतुल्यमस्ति, आकारमानं च प्रायः ५८लक्षकिलोमीटरमितमस्ति (सूर्य-बुधयोरन्तरालस्य दशमांशतुल्यम्) । एतस्मिन् क्षेत्रे तस्य गुरुत्वाकर्षणं तथा प्रबलं यथा ततः प्रकाशस्यैकः किरणोऽपि बहिर्निष्क्रान्तुं न शक्नोति । निकषा स्थिता या काऽपि तारा तत्प्रभावच्छायां प्राप्ता न ततो निर्गन्तुं शक्ता। कृष्णगर्तस्तस्या वायुं भक्षयित्वा क्रमशः समग्रामपि तां स्वकुक्षिसात् करोति ।

अत्रैतावान् विशेषो यत् — कृष्णगर्तस्य निवर्तननिषेधबिन्दुरूपं (Point of no return) यद् घटनाक्षितिजं (event horizon) तदतिक्रम्याऽपि तारा सम्पूर्णतया न तत्र निमज्जति किन्तु तस्याः कियानपि वायुः कृष्णगर्तस्योत्तर-दक्षिणध्रुवयोरतिबलवतीभिश्चुम्बकीयरेखाभिर्निगृह्य प्रकाशमानविद्युत्कणेषु परावर्त्यते प्रपातरूपेण च दूरं प्रक्षिप्यते । कृष्णगर्तो ह्यस्माकं दृष्टिगोचरो न कदाऽपि भवति, किन्तु लक्षशः किलोमिटर्-मितावेतौ द्वावपि प्रपातौ परमतेजस्विनौ स्तः । अतः कृष्णगर्तस्य पृथिव्याः षड्-विंशतिसहस्र(२६०००)प्रकाशवर्षाणि दूरत्वेऽपि रात्रौ वयं तं पौर्णमासीयचन्द्रादप्यधिकतया प्रकाशमानं द्रष्टुं शक्नुयाम । किन्तु दुर्भाग्यमस्माकं यद् वयं तद् दृश्यं द्रष्टुं नैव शक्ताः, यतो धनूराशेः (Sagittarrius) दिशि विद्यमानः कृष्णगर्तो वायुकणानां रजःकणानां च द्वादशसहस्र(१२०००)प्रकाशवर्षमितेन घनावरणेनाऽन्तरितोऽस्ति । ततश्च द्वयोरपि प्रपातयोः प्रकाशकिरणानां तमावरणं भित्त्वा निर्गन्तुं शक्यतैव नाऽस्ति ।

नासासंस्थाया 'हबल'दूरवीक्षणयन्त्रेण(Telescope) दूरवर्तिनीनामन्यासामाकाशगङ्गानां कृष्णगर्ताश्छायाचित्रत्वेन गृहीताः सन्ति, किन्त्वस्माकं ब्रह्माण्डस्याऽऽकाशगङ्गायाः केन्द्रं 'विलोकयितुं' न शक्तं तत् । हबलयन्त्रेण NGC 4261 – इत्यभिज्ञानेन प्रसिद्धाया आकाशगङ्गायाः कृष्णगर्तस्य प्रायशः ४०० प्रकाशवर्षमितं दलमुत्तर-दक्षिणध्रुवीयप्रपातौ च छायाचित्रत्वेन सङ्गृहीताः । एतद् दृष्ट्वैव खगोलविद्भिस्तस्य कृष्णगर्तस्य दलं १२००कोटिमितसूर्याणां दलस्य तुल्यं स्यादिति निर्णीतम् ।

एतद्विपरीततयाऽस्माकमाकाशगङ्गायाः कृष्णगर्तस्य सर्वमपि ज्ञानमनुमानादेव लभ्यम् । तस्य साक्षात्कारे आवरणस्याऽन्तरायत्वात् । एवं च स्थिते वयं कदाऽपि तस्य तथ्यं स्वरूपं ज्ञातुं नैव शक्ता इति निश्चप्रचम् । फलतश्च विज्ञानस्याऽप्यत्र सर्वदा सर्वकालं चाऽज्ञानमेव ।

**२. अस्यां पृथिव्यां कथं समुद्भूतं जीवनमैदम्प्राथम्येन – इति ज्ञातुं वयं सर्वथाऽशक्ताः ।** यतः -- प्राथम्येन ये जीवा जातास्तेषामुत्पत्तिविषयकाणि सर्वथाऽनिवार्याणि प्रमाणानि विनष्टानि सन्ति । निष्णातानां मतानुसारं हाइड्रोजन–कार्बन–नाइट्रोजन–हिलियम–ऑक्सिजन–निओनेति षड्भिस्तत्त्वैर्जगतः सर्जनं कृतम् । अद्य हि सर्वेषु जीवशरीरेषु ब्रह्माण्डे चाऽपि सर्वत्र ९८% तान्येव तत्त्वानि सन्तीति निष्णातानां मतमविरुद्धं प्रतिभाति । एवं सत्यपि तानि तत्त्वानि सेन्द्रियाणि (organic) न सन्ति परन्तु प्रत्येकं जीविनां शारीरिककोषास्तु सेन्द्रियपदार्थैर्निर्मिताः सन्ति । अतः प्रश्नोऽयमुत्तिष्ठते यत् निर्जीव(inorganic)–तत्त्वानि जीवत्कोषत्वेन कथं वा परावर्तितानीति । आमूलमिदं परावर्तनं कर्तुं काचिच्छक्तिस्त्वावश्यक्येव नियमात् ।

एतन्नियमं मनसिकृत्य जीवोत्पत्तेः प्रथमं सिद्धान्तं रशियादेशीयो जीवरसायनशास्त्री एलेक्झाण्डर–ओपारिनः प्रस्तुतवान् । १९२२तमे ऐसवीये संवति स कथितवान् यत् – ''पृथिव्या आदिकाले वातावरणे विलसन्तो हाइड्रोजन–कार्बनप्रमुखतत्त्वानां रेणव आकाशीयविद्युता सूर्यस्य च नीललोहितकिरणैः सेन्द्रियत्वेन परावर्तिताः । ततश्च ते रेणवो यदा समुद्रस्य सोष्मजले सम्मीलिताः सन्तः परस्परं तथा सङ्घटिताः क्वचित् कथञ्चिच्च, यथा तेषां तद् विशिष्टं सङ्घटनं सजीवकोषरूपेण परिणतम् । तत्र च सङ्घटने मुख्यघटकानि ओजोद्रव्य(protein)स्थमेमिनो–अम्लं (Amino acid), RNA - DNA इत्यनयोश्चत्वारि मूलद्रव्याणि, कोषरचनार्थं चोपयुक्तं मेद आसन्'' ।

सिद्धान्तमेनं प्रमाणयितुं १९५०तमे संवति अमेरिकीयरसायणशास्त्रिणा स्टेनलीमिलर–इत्यनेन प्रयोगः कृतः । तेनैकस्मिन् बृहदाकारे काचभाजने आदिकालीन–पृथिवीसदृशं वातावरणं सृष्टम् । ततो विद्युद्दण्डेन तदन्तर्विद्युत्स्फुलिङ्गानि वर्षितानि । सप्ताहानन्तरं किञ्चित् साफल्यं तेन प्राप्तम् । कार्बन–तत्त्वस्य पञ्च प्रतिशतं(५%) प्रायो दलमोजोद्रव्यघटक–एमिनोएसिडद्रव्यत्वेन परिणतम् । किन्तु तत्पुनः ओजोद्रव्यत्वेन न परिणतमतो जीवत्कोषस्याऽपि सर्जनं नैव जातम् ।

ततो मिलरः केनचित् पृष्टो यत् – 'सजीवकोषसर्जने कियान् काल आवश्यकः ?' तेनोक्तं – 'दश वर्षाणि अपर्याप्तानि, शतमप्यपर्याप्तानि । लक्षं वर्षाणि प्रतीक्षितुं धैर्यं यदि स्यात् तदा वरम् । दशलक्ष–वर्षैरपि यदि तत् सर्जनं न जायेत तर्हि निश्चयेन तत् कदाऽपि न भविष्यति !' इति ।

किञ्च, प्रारम्भिकजीवकोषान् विरचयितुं ये सेन्द्रियपदार्था विशिष्टसङ्घटनत्वेन मिलिता आसन् तेषां कवचरूपमस्थिरूपं वा कठिनमङ्गं नाऽऽसीदतस्ते पृथ्व्यां विलीना जाताः । न केऽप्यवशेषास्तेषां कुत्राऽपि प्राप्यन्तेऽतस्ते जीवकोषाः कथं समुद्भूता इत्येतदपि ज्ञातुं सर्वथाऽशक्यमेव★ ।

★ एतत् तु विज्ञानस्य मतम् । भारतीयदर्शनानां मतेन विशेषतस्तु जैनदर्शनमतेन जीवः सार्वकालिक एव । शरीराणि तु परावर्तन्ते । अतो जीवः कथं समुद्भूत ऐदम्प्राथम्येन - इत्येषा समस्या विज्ञानस्यैव, न त्वस्माकम् ।

**३. ब्रह्माण्डं यत: समुद्भूतं स महाविस्फोट: ( Big bang ) कथं जात-इत्यस्य ज्ञानमस्माकं न कदाऽपि भविष्यति** यत: ----- महाविस्फोटात् पूर्वतनी परिस्थितिरवलोकयितुं सर्वथाऽशक्या । इदानीं ब्रह्माण्डं येन पदार्थेन विनिर्मितमस्ति तस्याऽमेयस्य पदार्थस्याऽणुमात्रस्याऽपि महाविस्फोटात् पूर्वमस्तित्वमेव नाऽऽसीत् । अद्य ब्रह्माण्डं सञ्चालयन्त्यो विद्युच्चुम्बकत्वशक्तिर्गुरुत्वाकर्षणशक्तिर्दृढा शक्तिरदृढा शक्तिश्चेति (Strong force and Weak force) चत्वारि प्राकृतिकबलानि तदानी नाऽविद्यन्त, तेभ्यो विना च ब्रह्माण्डस्यैवाऽसम्भव: स्यात् । तथा, आइनस्टाइन-मतानुसारं तु महाविस्फोटात् पूर्वमवकाश: (Space) समय(time)श्चाऽपि नाऽविद्येताम् । अवकाशस्य मानं शून्यमासीत् समयश्चाऽपि शून्ये एव स्थगित आसीत् । केवलमनन्तसूक्ष्मतारूपबिन्दोरेवा(infinite singularity)ऽस्तित्वमासीत् ।

दुर्बोधं किलैतत् - कथङ्कारं सूक्ष्मोऽयं बिन्दुर्ब्रह्माण्डत्वेन परावर्तित: खल्विति । महाविस्फोटात् पूर्वं त्वणुमात्रमपि नाऽऽसीदिति तूक्तमेव ननु ! पदार्थस्याऽनस्तित्वमेव सर्वथा ! किन्त्विदानीं ब्रह्माण्डे अर्बुदश आकाशगङ्गा: ! प्रत्येकमाकाशगङ्गायामपि प्रायोऽर्बुदशतमितानि तारकाणि ! पदार्थस्य मानमेव नास्ति खलु !

पदार्थस्य सर्जनं हि सदाऽपि प्रतिनियतशक्तिभिरेव भवति । यदि महाविस्फोटात् पूर्वं चत्वारि प्राकृतिकबलान्येव नाऽऽसंस्तदा महाविस्फोटस्य तस्य भवने के वा सिद्धान्ता: कारणीभूता: ?

प्रश्नोऽयं सदाऽप्यनुत्तरित एव स्थास्यति । निष्णातैर्यद्यपि प्रश्नमेनं समाधातुमनुमानद्वयं विहितमस्ति तथाऽपि तेन पूर्णं समाधानं नैव भवति । पश्यामस्तावत् — प्रथमं हि, यदाऽस्माकं ब्रह्माण्डात् पूर्वतनं ब्रह्माण्डं भूरिविस्तरणानन्तरं सङ्कोचितुमारब्धं तदा गुरुत्वाकर्षणबलेन तस्य समस्तमपि द्रव्यं समकेन्द्रबिन्दुं प्रति प्रणुन्नम् । द्रव्यसङ्कोचस्य सततं जायमानत्वादुष्णतामानमपि प्रवृद्धम् । अतो गच्छता कालेन महानिष्पेषस्य (Big Crunch) स्थितिरुत्पन्ना । ब्रह्माण्डमिदानीं केवलं बिन्दुरूपमेवाऽऽसीत् । क्रमशो वर्धमानेनोष्णतामानेन केन्द्रत्यागि बलं तथा वर्धितं यथां बिन्दुरयं विस्फोटं प्रति प्रगुणो जात: । यद्यपि गुरुत्वाकर्षणबलेन स सर्वथा प्रतिरुद्ध आसीत् तथाऽपि केन्द्रत्यागिबलस्याऽऽधिक्यात् महाविस्फोटो जात एव, ब्रह्माण्डं च पुनरपि विस्तरीतुमारब्धम् । एतच्च ब्रह्माण्डमस्माकमासीत् ।

यद्यपि तार्किकमिदमनुमानं, तथाऽपि, एतस्य स्वीकारानन्तरमपि प्रश्नोऽयमुत्तिष्ठते यदस्माकं ब्रह्माण्डात् पूर्वतनं ब्रह्माण्डं जनयितुं जातो महाविस्फोट: कथङ्कारं समुद्भूत: खलु ? अनवस्थैवाऽत्र स्यात् ! तस्या निवारणार्थं निष्णातैर्द्वितीयमनुमानं कृतम् । परिमाणसिद्धान्तानुसारं (Quantum theory) बह्व्यो घटना: स्वयमेव निष्कारणं जायन्ते, पदार्थस्य च स्वयमेव प्रकटीभवनमपि सुशकमेव । शून्यावकाशादपि पदार्थकणा: स्वयमेव प्रकटीभूता: सन्ति प्रयोगेषु । अतोऽत्राऽपि निष्णाता अनुमिन्वन्ति यद् ब्रह्माण्डं शून्यावकाशे स्वयमेव सञ्जातेन महाविस्फोटेन सृष्टं स्यादिति ।

किन्त्वेतदपि खल्वनुमानमेवाऽस्ति । इत: १३.७ अर्बुदमितवर्षेभ्य: पूर्वं महा★विस्फोटो जातस्तस्मात्

★ जैनदर्शनानुसारं तु जगदिदमनाद्यनिधनमेवाऽस्ति । अतस्तस्य सृष्टिर्विनाशो वा नैव जायते कदाचिदपि ।

पूर्वतने काले किं वा सञ्जातं तत् साक्षाज्ज्ञातुं तु वयं सर्वथाऽसमर्था अतस्तस्य ज्ञानमस्माकं न कदाऽपि भविष्यति । तदज्ञानमेव विज्ञानस्य सार्वदिकम् ।

**४. मस्तिष्के विचारः कथं समुद्भवति - इत्येतज्ज्ञातुं सर्वथाऽशक्यम् ।** यतः ----- मस्तिष्कं ह्याकारविशेषघटितैः कोषैः संरचितं मूर्त्तमस्ति, विचारास्तु निराकारत्वादमूर्त्ताः सन्ति । यथा हि - दुःखं, प्रसन्नता, सहानुभूतिः, शोको, भावुकतेत्यादयो भावास्तथा, सत्यानृतयोर्निर्णयनं, समस्यानां स-तर्कं निराकरणं, भाविन आयोजनमित्यादयो ये विचारा मस्तिष्के समुद्भवन्ति ते घनस्वरूपा नैव सन्ति। अतः साकारेण सह निराकारस्य सम्बन्धः कथं भवति - इत्येतज्ज्ञातुं न शक्ताः केऽपि । यद्यपि विचारणानन्तरं विचारविशेषस्य प्रकारो ज्ञातुं शक्य एव, किन्तु विचार एव कथं समुद्भूत इत्येतत्तु सर्वथा न शक्यं ज्ञातुम् ।

वैज्ञानिका हि मस्तिष्कस्य कार्यप्रकारमेवं वर्णयन्ति सङ्क्षेपेण — प्रत्येकं कोषः (neuron) स्वप्रतिवेशिकोषेण सह सान्तरं संयुक्तोऽस्ति । एकेन कोषेण प्रेषिता रासायनिकाः सन्देशाः (neurotrans-mitters) तदन्तरमतिक्रम्याऽन्यं कोषं प्रभावयन्ति पूर्वं प्रभावितं वा शान्तं कुर्वन्ति । एवं चैतेषां सन्देशानां समग्रं परिभ्रमणं ज्ञानतन्त्रद्वारा सर्वा अपि शारीरिकक्रियाः सञ्चालयति नियमयति च । यद्यपि, एषा सर्वाऽपि प्रक्रिया न केवलं मनुष्यमस्तिष्के अपि तु मनुष्येतरप्राणिनां मस्तिष्केष्वपि सततं वर्तमाना भवति, अतो नूतनं तत्र न किञ्चिदस्ति । तथाऽपि, मनुष्यमस्तिष्के विचाररूपा या मानसिकप्रक्रिया भवन्ती विलोक्यते सा शारीरिकप्रक्रियात विशिष्टा उच्चस्तरीया चाऽप्यस्ति, तया प्रक्रियया मनुष्यः स्वेतरप्राणिभ्यो नैकगुणिते उच्चपदे प्रतिष्ठितो भवति; मनुष्यस्य च बुद्धिमत्ताऽपि तामेव प्रक्रियामवलम्बते, अतो मूर्त्तस्वरूपे मस्तिष्के अमूर्त्ता निराकारा वा विचाराः कथं समुद्भवन्ति - इत्येतद् विज्ञानिनां संशोधनस्य विषयीभूतमस्ति।

अत्र क्षेत्रे ऐदम्प्राथम्येन ऐसवीये १९३०तमे संवति केनेडादेशीयो मस्तिष्कशस्त्रचिकित्सको वाइल्डर-पेनफिल्डनामा प्रयत्नं कृतवान् । शस्त्रचिकित्सातोऽपि तस्य समादरः संशोधने आसीत् । अतः स स्वचिकित्स्यान् रोगिभ्यः संवेदनानाशकमौषधं (local anaesthesia) दत्त्वा तेषां करोटिं समुद्घाटयति स्म, ततश्च तेषां विचारप्रेरकान् प्रश्नान् पृच्छति स्म । विचारकरणेन तेषां मस्तिष्के यत्र यत्र संवेदनं भवति स्म तत्तत् क्षेत्रं तेन यन्त्राणां सहायेन समुपलभ्याऽऽलेखितम् (mapping) । एतेन विचारसर्जका मस्तिष्कविभागा के - इति तु सामान्येन ज्ञातमभवत् । चिकित्साक्षेत्रे एतादृशं संशोधनमैदम्प्राथम्येनैव सञ्जातम् । एवंस्थितेऽपि विचाराणां सर्जनं कथं कया वा प्रक्रियया (thought process) भवतीति तु सर्वथा-ऽज्ञातमेवाऽतिष्ठत् ।

अद्यत्वे तु मस्तिष्कस्य बाह्यत एव सूक्ष्मावलोकनकराणि (Scanning) साधनानि सन्ति । अतः करोटिविदारणादिकं नाऽनिवार्यम् । साधनस्य (Scanner) प्रतिच्छायायां विचार-तर्कादिसर्जक-मस्तिष्कभागाः स्पष्टतया प्रकाशिता भवन्ति । (अर्थात् तेषु विभागेषु रक्तप्रवाहस्य न्यौन्याधिक्यं जायमानं तत्साधने प्रतिबिम्बितं भवति) । परं विचारोत्पत्तेः प्रक्रिया तु कथमपि ज्ञातुं न शक्या तादृशसाधनैरपि ।

भविष्यत्यपि तज्ज्ञानस्य सम्भावना नास्त्येव । यतो यद्यपि मनुष्यमस्तिष्कं सङ्गणक(Computer) तुल्यमस्तीति प्रथ्यते तथाऽपि तस्य कार्यं संरचना च न सङ्गणकतुल्ये । सङ्गणके सर्वमपि कार्यं केवलं On-off सङ्केतैरेव भवति परन्तु मस्तिष्के तथा भवदपि कोषैः प्रेषितानि यानि रसायनानि सन्ति तेषामेवाऽत्र कार्ये मुख्यभागो भवति । एतानि रसायनानि डायोमाइन-एन्डोर्फिन-सेरोटिनिन-इत्यादीनि दशाधिकानि सन्ति । एक एव कोषः समकालमेव बहूनि रसायनानि सम्प्रेषितुं समर्थोऽस्ति । ततश्च मस्तिष्के तेषां संयोजनानि अष्टशताधिकानि भवन्ति । एतेषां सर्वेषामपि कार्यप्रकारं ज्ञातुमवबोद्धुं वा सर्वथाऽशक्यमेवेति विचाराणां समुद्भवः कथं भवतीति रहस्यं तु सर्वथाऽज्ञेयमेव भविष्यति★ ।

**५. ब्रह्माण्डस्य पर्यवसानं कुत्रेति ज्ञातुं वयं न कदापि प्रभविष्यामो यतः** ----- सततं विस्तीर्यमाणे ब्रह्माण्डे सर्वथा दूरवर्तिन्याकाशगङ्गा कियद्दूरं प्राप्तेति निर्णेतुं नैव शक्यमस्ति ।

पुरा किल दृष्टिपथगोचरतारकैः सीमितमेव ब्रह्माण्डमस्तीति जना मन्यन्ते स्म । किन्तु १६०९तमे ऐसवीये वर्षे यदा प्रथमस्य व्यावहारिकदूरवीक्षणयन्त्रस्या(telescope)ऽऽविष्कारो जातस्तदनन्तरं क्रमश आकाशदर्शकानां दृष्टिमर्यादा विस्तृता जाता ब्रह्माण्डस्य च समधिको विस्तारो दृष्टिगोचरोऽभवत् । विश्वसंरचना(Cosmology)क्षेत्रेऽभूतपूर्वा सीमाचिह्नस्वरूपा च घटना १९२०तमे वर्षे जाता यदा अमेरिकीय-खगोलशास्त्रिणा एडविन-हबलनाम्नाऽवलोकितं यत् — सर्वा अपि ब्रह्माण्डस्था आकाशगङ्गाः परस्परतो दूरं गच्छन्ति स्म, एतावदेव न, किन्तु दूरस्था आकाशगङ्गा निकटस्थिताभ्योऽधिकवेगेन दूरं गच्छन्ति स्म।

एतच्च विस्तरणं, फुल्लति फुद्दे स्थितानां शबलबिन्दूनां सदृशमस्तीति तेन प्रतिपादितम् । फुल्लनमानं हि फुद्दे यद्यपि सर्वत्र तुल्यमेव भवति तथाऽपि शबलबिन्दूनां दूरत्वं सर्वत्र तुल्यं न भवति। निकटस्थयोर्द्वयोर्बिन्द्वोर्दूरत्वस्याऽपेक्षया दूरस्थानां बिन्दूनां मध्येऽधिकमन्तरं भवति, ततश्च विस्तरणमपि तदनुसारमल्पमधिकं वा भवति ।

अनेनैव प्रकारेण ब्रह्माण्डस्थिता आकाशगङ्गा अपि परस्परमन्तरिताः सन्ति — इति एडविनहबलेन प्रतिपाद्य तेषां वेगं निर्णेतुमचलाङ्कोऽपि (Hubble Constant) तेनैव संशोध्य निरूपितः । अयमचलाङ्कः प्रतिक्षणमाकाशगङ्गाया वेगं दर्शयति । तन्मूल्यमस्ति ५५८ किलोमिटर-प्रमाणम् । अर्थाद् याऽऽकाशगङ्गा पृथिवीत एकमेगापार्सेकमिते दूरे वर्तते सा प्रतिक्षणं ५५८ किलोमिटरवेगेन ततो दूरं धावति । (१ पार्सेक (Parsec) = प्रायः ३.२६प्रकाशवर्षमितमन्तरम् । १ मेगापार्सेक (Megaparsec <Mpc>) = ३२,६०,००० प्रकाशवर्षमितमन्तरम् । अचलाङ्कानुसारं हि पृथिवीतो दशमेगापार्सेकमितदूरं याऽऽकाशगङ्गा वर्तते सा प्रतिक्षणं ५५८०किलोमिटरवेगेन धावन्ती तुल्ये कालमाने दशगुणितमन्तरं प्राप्नोति ।

महाविस्फोट(Big bang)स्याऽनन्तरं कोटिशो वर्षेशु अर्बुदश आकाशगङ्गा समुद्भूताः । तत्र च या आकाशगङ्गा प्रारम्भे समुद्भूतास्तास्त्वद्य बहुदूरं प्राप्ताः सन्ति । तासां वेगः प्रकाशवेगमपि समतिक्रान्तोऽस्ति ।

★ जैनदर्शने मनोवर्गणायाः पुद्गलान् गृहीत्वा जीवो विचाररूपेण प्रवाहयति(मुञ्चति) - इति स्पष्टं निरूपितमस्ति ।

(यद्यपि प्रकाशवेगमानतोऽधिकेन वेगेन गन्तुमशक्यमेव। किन्त्वयं नियमोऽन्तरिक्षे स्वयं गतिमतां पदार्थानां कृतेऽस्ति, स्वयमन्तरिक्षकृते नास्ति । अतोऽन्तरिक्षस्था आकाशगङ्गा प्रकाशवेगमानतोऽप्यधिकवेगेन गन्तुमर्हन्ति ।)

ब्रह्माण्डस्य पर्यवसानं विस्तारं वा ज्ञातुं या समस्या वर्तते साऽप्यनेनैव कारणेन। प्रकाशवेगमान-मप्यतिक्रान्तानामाकाशगङ्गानां प्रकाशोऽस्माकं दृष्टिमर्यादायां नैव समागच्छति। अतः सर्वथा दूरवर्तिन्या-काशगङ्गा सम्प्रति कुत्र वर्तते, तत्कारणाच्च ब्रह्माण्डमपि कियद् विस्तीर्णं सञ्जातमिति तु ज्ञातुं सर्वथा-ऽशक्यमेव ।

यद्यपि खगोलविदोऽनुमिन्वन्ति यद् दृश्यब्रह्माण्डप्रमाणतुल्यमेवाऽदृश्यब्रह्माण्डमप्यस्ति (अर्थात् १३.७अर्बुदमितप्रकाशवर्षत्रिज्याप्रमाणमस्ति) । किन्तु तद्ध्यनुमानमेवाऽस्ति । साक्षात् तत्प्रमाणं तु न कदाऽपि ज्ञास्यते । अतोऽन्येषामज्ञानानामिव तदप्यज्ञानमेव भविष्यति सार्वकालिकं विज्ञानस्य कृते ।

(विषयसङ्कलनं सौजन्यं च - गूर्जरभाषीया **सफारी**मासपत्रिका)

# पत्रम्

**मुनिधर्मकीर्तिविजयः**

नमो नमः श्रीगुरुनेमिसूरये ॥

आत्मीयबन्धो ! चेतन !

धर्मलाभोऽस्तु ।

सगुरुवरं वयं सर्वेऽपि सातान्विताः स्मः । तवाऽपि कुशलं कामये । धंधुकानगरसमीपस्थ-'तगडी'ग्रामे नन्दनवनतीर्थमध्ये सानन्दं विविधानि धर्मकार्याणि समाप्य खंभातनगरं वयमागच्छाम ।

भगवता महावीरेण श्रीआचाराङ्गसूत्रे सूत्रमेकं कथितं, तल्लक्ष्यीकृत्य किञ्चिद् लिखामि ।

सव्वे पाणा पियाउया सुहसाया, दुक्खपडिकूला अप्पियवहा ।
पियजीविणो जीविउकामा, सव्वेसिं जीवियं पियं ॥

(सर्वे प्राणिनः प्रियायुषः सुखसाताः दुःखप्रतिकूलाः अप्रियवधाः ।
प्रियजीविनः जीवितुकामाः सर्वेषां जीवितं प्रियम् ॥)

सर्वेषां प्राणिनामायुः प्रियमस्ति, सर्वेऽपि सुखमिच्छन्ति, न केभ्योऽपि दुःखं वधश्चाऽभिरोचते, सर्वेऽपि जीवितुमभिलषन्ति, एवं सर्वेषामपि जीवानां स्वकीयं जीवनं प्रियमस्ति - इत्युक्तं भगवता वर्धमानेन । एतदेव पूर्णाहिंसायाः स्वरूपनिरूपणमस्ति ।

बन्धो ! यदा दया, कारुण्यं, वात्सल्यं च विहाय भौतिकसुखार्थं यज्ञादिषु पशूनां हिंसा क्रियते स्म जनैस्तदा धर्मक्षेत्रे निर्दयताया हिंसायाश्चैव विशेषतः प्राधान्यं प्रसृतमासीत् । तादृशे काले ज्ञातपुत्रेण सिद्धार्थनन्दनेन श्रीवर्धमानमहावीरेण जनसमूहस्य नूत्ना दिक् प्रदर्शिता । अहिंसा संयमस्तपश्चेत्यादिका

पुरुषार्थमूलोपासना निरूपिता । एतस्या आराधनेनाऽऽत्मनः कल्याणं कुर्वन्तु - इत्युक्तं च । धर्मः केवलं व्यक्तिगतमाचरणं न, अपि तु सामाजिकावश्यकता तथा समाजव्यवस्थायाः प्रधानमङ्गमस्ति । ततो धर्मोन्नत्यर्थं क्रियायुक्ता नूत्ना दृष्टिरावश्यकी अस्तीति देशितं च ।

तस्मिन् काले समाजे धनिको निर्धनश्चेति वर्गद्वयं विद्यमानमासीत् । धनिका निर्धनजनान् शोषयन्ति स्म । ततो धनार्जनं कर्तुं यत् किमपि कुर्वन्ति स्म ते जनाः । तथैव समाजे ब्राह्मणो वैश्यः क्षत्रियः शूद्रश्चेति वर्णव्यवस्था विद्यमानाऽऽसीत् । किन्तु सा कालक्रमेण रूढित्वेन परावर्तिता जाता । ततोऽमुककुले जाता उत्तमाः, अन्यत्र जातास्त्वधमाः । एवं नारी दुर्बलोपेक्षणीया चेति मन्यन्ते स्म ते । एतादृशे काले वीरभगवता निर्भीकतया शूद्रादिकुलेषु जातास्तथा नार्यश्चाऽपि प्रव्राजिताः । तेषामपि धर्मस्य मोक्षस्य चाऽधिकारोऽस्ति, इति निरूपितम् । यतो जनो न जन्मनाऽपि तु कर्मणा ब्राह्मणो वैश्यः शूद्रो वाऽस्ति। एवं भगवता नवीना दृष्टिरुद्घाटिता ।

बन्धो ! वीरभगवता मुख्यतो द्वे दृष्टी प्ररूपिते । यतोऽत्र द्वयोर्दृष्ट्योरन्तर्गतमेव जिनशासनस्य सर्वमपि ज्ञेयं समाविष्टं भवति । एका विचारदृष्टिः, द्वितीयाऽऽचारदृष्टिश्च ।

अत्र — विचारदृष्टिर्नाम स्याद्वाददृष्टिः, तन्नामाऽनेकान्तवादः ।

आचारदृष्टिर्नाम यथार्हव्रतपालनम् ।

तत्र प्रथमं विचारदृष्टिं विचारयामः ।

अहिंसा जैनधर्मस्य मूलमस्ति । तां विना जैनदर्शनस्याऽस्तित्वमसम्भावनीयम् । कस्मैचिदपि न दुःखं देयं, न च कोऽपि पीडनीयः - इत्येषाऽहिंसा तु स्थूलस्वरूपा । परमत्र तु सूक्ष्माऽहिंसाऽपि वर्णिता। कायिक्या अहिंसाया यावन्महत्त्वं तावदेव वाचिक्या मानसिक्याश्चाऽहिंसाया अपि प्राधान्यमस्ति । अत एव कस्यचिदप्यशुभं भवेत्तादृशं कथनं वाचिकी हिंसा, तथैवाऽशुभं चिन्तनं मानसिकी हिंसा च प्रोक्ता ।

एतस्या अहिंसाया विशेषतः पालनार्थं भगवता स्याद्वाददृष्टिराविष्कृता । अत्र दृष्टौ न कस्यचिदपि विरोधोऽस्ति, सर्वेषामपि विविधापेक्षया स्वीकारोऽस्ति । यथा — एको घटो मृद्द्रव्यापेक्षयाऽस्ति, किन्तु सुवर्णद्रव्यापेक्षया नास्ति । एवमेको मृद्घटोऽपि अहमदाबादक्षेत्रापेक्षया विद्यमानोऽस्ति, किन्तु वटपद्रक्षेत्रापेक्षया नास्ति । द्वादशघण्टावादनापेक्षया घटोऽस्ति, किन्तु षड्घण्टावादनापेक्षया नास्ति । एवंरीत्या कस्याऽपि वस्तुनः स्वीकारोऽस्वीकारश्च कर्तुं शक्यः स्याद्वाददृष्ट्यैतया । एषा विभावनाऽत्रैव प्राप्यते, नाऽन्यत्र कुत्रचिदपि । अत एव न कोऽपि प्रतिवादं कर्तुं शक्तो जैनदर्शनेन सह ।

चेतन ! जीवा अनन्ताः सन्ति । सर्वेष्वपि जीवेषु आत्मसादृश्यमस्ति । तथाऽपि संस्कारेण कर्मणा बाह्यपरिस्थित्या चाऽऽचार-विचारेषु वैषम्यं दृश्यते एव । यद्येकस्यैव मानवस्याऽपि द्रव्य-क्षेत्र-कालादिभेदैराचार-विचारेषु भिन्नता प्रवर्तेत तर्हि भिन्न-भिन्नानां मानवानामाचार-विचारेषु विसदृशता कथं न भवेत् ? एवंस्थिते एकस्यैव कथनं वस्तूनां वा निश्चयेन ग्रहणं केवलं दुराग्रह एव भवति । दुराग्रहस्तु

हिंसां प्रति प्रेरयति । अत एव वीरभगवता विचारदृष्टिरूपा स्याद्वाददृष्टिः प्ररूपिता ।

किञ्च – जैनधर्मो न कदाचिदपि प्रान्तवादे बद्धः, परं समग्रराष्ट्रे प्रसृतोऽस्ति । जैनधर्मानुसारेण चतुर्विंशतिस्तीर्थकरा जाताः । तेषां सर्वेषामपि जन्मभूमिरन्या कर्मभूमिश्चाऽन्या, दीक्षास्थलमन्यद् निर्वाणस्थलं चाऽन्यदस्ति । एवं तैः सर्वदेशेषु विचरणं कृतं, न कुत्रचिदपि प्रतिबन्धो दर्शितः । कथमेवं कृतं तैः ? – इति प्रश्न उद्भवेदेव । तत्र कारणमेनदेव यत् – तैर्यो धर्मो निरूपितः स सर्वजनग्राह्यो धर्मोऽस्ति, तथा स 'निर्ग्रन्थधर्मः श्रमणधर्मश्चे'ति नाम्ना विख्यातः, न तु जैनधर्म इति ।

– रागस्य द्वेषस्य च ग्रन्थिं यो विमुञ्चति स निर्ग्रन्थः ।

– य उपशमभावं धरति स श्रमणः ।

– कर्मनाशार्थं यः परिश्राम्यति स श्रमणः ।

पश्य, वर्णजात्यादिभेदरहिततया यः कोऽपि जन एनं धर्ममाराधयितुं समर्थोऽस्ति ।

एवं सर्वेऽपि जैनागमास्तत्तज्जनपदप्रसिद्धप्राकृतभाषासु निबद्धाः । येन ते सर्वेषामपि ग्राह्याः स्युः । अद्य भाषां विषयीकृत्य जनाः क्लेशं कुर्वन्ति, परंतु तीर्थकरैः सर्वग्राह्यभाषाः स्वीकृत्य क्लेशो निवारित आसीत् । एवं वाचिकी कायिकी च हिंसे निवारिते ।

एवं साहित्यक्षेत्रेऽपि श्रीमहावीरेण स्याद्वाददृष्टिरङ्गीकृता । जैनशास्त्रेष्वन्यदर्शनमान्यमहापुरुषाणां जीवनचरितं तथा तच्छास्त्राणां चोल्लेखा अपि प्राप्यन्ते । अन्यत्र यानि यानि पात्राणि कुत्सितरीत्याऽऽलेखितानि तानि पात्राण्यपि जैनशास्त्रेषु सादरमौचित्येन प्ररूपितानि । अहो ! कीदृशी उदारदृष्टिः ।

बन्धो ! एवमत्र न कस्यचिदपि मतस्य मतावलम्बिनां च तिरस्कारः कृतः । तस्मिन् काले भगवतो महावीरस्य पर्षदि भिन्न-भिन्नमतावलम्बिनः ३६३ तीर्थिकाः समागच्छन्ति स्म । तथाऽपि तेषां मध्ये क्लेशो नाऽऽसीत् । यतो वीरभगवता नैगमादीनां सप्तानां नयानामालम्बनेन सर्वेऽपि मतावलम्बिनः संगृहीताः ।

यद्येषा विचारदृष्टिः सर्वैः स्वीक्रियते तर्हि जातौ समाजे देशे च न कुत्राऽपि क्लेशः संभाव्येत। एषा दृष्टिः सर्वजनीना विश्वशान्तिकरी विश्वसंरक्षिका विश्वसंवर्धिका चाऽस्ति ।

द्वितीया दृष्टिरस्ति आचारदृष्टिः ।

हिंसाया अन्यदेकं कारणमस्ति अतृप्तिः असंयमश्च । एषाऽतृप्तिर्महतोऽनर्थस्य निदानमस्ति । एतस्या अतृप्तेर्निरसनार्थं मनसो नियमनमतीवाऽऽवश्यकमस्ति । आत्मकल्याणं न केवलं बोधेन ज्ञानेन च, अपि त्वाचरणेन।

भो ! ज्ञानस्य फलं विरतिः । विरतिर्नामाऽशुभकार्यस्य त्यागः । तदेव ज्ञानमुच्यते येन ज्ञानेनाऽकार्यस्य त्यागः स्यात् ।

पूज्यपादश्रीधर्मदासगणिना कथितम् –

तो पढियं तो गुणियं, तो मुणियं तो अ चेइओ अप्पा ।
आवडियपेल्लियामंतिओ वि जइ न कुणइ अकज्जं ॥ (उपदेशमाला-६४)

(तदा पठितं, तदा गुणितं तदा ज्ञातं, तदा च ज्ञाता आत्मा ।
आपतित-प्रेरितामन्त्रितोऽपि यदि न कुर्यादकार्यम् ।)

अतोऽपि विचारदृष्टिमनुसृत्यैवाऽऽचारदृष्टिः वर्णिता । यत आचारो विचारस्य समान्तरोऽस्ति । एवमात्मानमनुशासितुं संयमयितुं चैवमन्येषामधिकाररक्षणार्थमादरभावमुत्पादयितुं च बहूपयोगिनी दृष्टिरस्ति एषा । अतो भगवताऽऽचारस्य पालनार्थं विवक्षितजीवानां कृते व्रतानि निरूपितानि । तत्र श्रमणानां कृते पञ्चानां महाव्रतानां तथा श्रावकाणां कृते द्वादशव्रतानां प्ररूपणं कृतं भगवता ।

तत्र – केषाञ्चिदपि जीवानां वधः, तेषामङ्गोपाङ्गानां छेदनं, तेषां बन्धनम्, आश्रितस्य शोषणं पीडनं चेति प्राणातिपातो हिंसा । एतस्माद् विरमणं, तन्नाम प्राणातिपातविरमणं प्रथमं व्रतम् ।

– सर्वदा सत्यमाश्रयणीयम्, कस्मैचिदपि मृषोपदेशो न देयः, तन्नाम द्वितीयं मृषावादविरमणं व्रतम् ।
– अन्येषां वस्तूनामचौर्यं वाणिज्ये नीतेराचरणं, च, तन्नाम तृतीयमदत्तादानविरमणं व्रतम् ।
– स्वपत्न्यामेव सन्तोषः, परस्त्रियः प्रति कुदृष्टेस्त्यागश्च चतुर्थं स्वदारासन्तोष-परस्त्रीगमनविरमणं व्रतम् ।
– आवश्यकधनस्य संग्रहो नाऽतृप्तिः, किन्तु विशेषधनस्य परिग्रहोऽतृप्तिः । अत एव परिग्रहस्य परिमाणम्, इच्छायाश्च परिमाणं नाम पञ्चमं व्रतमुक्तम् ।

बन्धो ! यथा यथा लाभो वर्धते तथा तथाऽतृप्तिस्तृष्णा चाऽपि वर्द्धते । अत्राऽतृप्तिः केवलं धनस्यैव भवतीति न, अपि तु व्यक्तेर्वस्तुनो वातावरणस्य पद-प्रतिष्ठाया महत्त्वाकाङ्क्षायाश्चाऽपि भवति । अतृप्तिः क्लेशं सङ्घर्षं च जनयति, क्लेशो दुःखस्य कारणमस्ति । दुःखी जीवो न कदाऽपि शान्तिमनुभवति । अतः क्लेशनिवारणार्थं सन्तोषस्तृप्तिश्चैवोत्तममार्गोऽस्ति ।

एवमहिंसायाः पालनार्थं व्यवहारशुद्ध्यर्थं चैवाऽतीवोपयोगीनि व्रतान्येतानि सन्ति ।

– निश्चितपरिमाणादधिकं न गमनं नाम षष्ठं दिक्परिमाणं व्रतम् ।

– यस्य वस्तुन एकवारमुपयोगो भवति स भोग उच्यते, अनेकश उपयोगो भवति स उपभोगः कथ्यते । एवं खाद्याखाद्य-पेयापेय-करणीयाकरणीयादीनां भोग-उपभोगयोग्यानां वस्तूनां परिमाणं नाम सप्तमं व्रतम् ।

– प्रेक्षणक–नाटकादिना कर्मणाऽकारणं आत्मा दण्ड्यते सोऽनर्थदण्डः । ततो विरमणं नाम अष्टममनर्थदण्डविरमणं व्रतम् ।

एतानि त्रीण्यपि व्रतान्यहिंसां दृढयन्ति ।

– घटिकाद्वय(४८निमेष)पर्यन्तमेकस्मिन् स्थाने समभावमादृत्य स्थिरतयोपवेशनं नाम नवमं सामयिकव्रतम् ।

– एवं दशमं देशावकाशिकव्रतं, एकादशमं पौषधोपवासव्रतं चेति द्वे अपि व्रते सामायिकव्रततुल्य–स्वरूपे एव स्तः ।

– अतिथिभ्योऽन्नादिकं देयमिति द्वादशममतिथिसंविभागं नाम व्रतमस्ति ।

एतानि सर्वाण्यपि द्वादश व्रतान्याचाररूपाणि सन्ति । तेषां पालनं हिंसाया विरमयति । अत एव महावीरभगवताऽऽचाररूपेण द्वादशव्रतानि निरूपितानि । एतेषु व्रतेषु जीवनविषयकाः सर्वा अपि प्रवृत्तयः समाविष्टा भवन्ति ।

एवं सर्वेषां जनानां हितायैते द्वे दृष्टी विशेषत उपकारिण्यौ स्तः । अतस्त्वमपि स्वजीवने विचार–आचारदृष्ट्योः पालनेनाऽहिंसाया विशेषत आराधनेन त्वरितमात्मकल्याणं साधय, इत्याशासे ।

# काव्यचतुष्ट्यी

**अनुवादकः मुनिकल्याणकीर्तिविजयः**

## १. शब्दाः

**गूर्जरमूलम् –**

**शब्दो**

मदनकुमार अंजारिया 'ख्वाब'

तमारा थकी
कविता
प्रेमपत्र
प्रमाणपत्र
श्लोक
वगेरे लखी शकाय छे;
तो वळी
राजीनामुं
जासाचिट्ठी
नोटिस
के गाळ पण
लखी शकाय छे !
हे शब्दो !
आ तमारी
खूबी छे के खामी ?

**संस्कृतानुवादः**

भवतां माध्यमेन
काव्यं
प्रेमपत्रं
प्रमाणपत्रं
श्लोकाः
इत्यादि लिखितुं शक्यते
पुनश्च
त्यागपत्रं
भापनपत्रं
सूचनापत्रम्
अथवा गालिरपि
लिखितुं शक्यते !
भोः शब्दाः !
किमेषा भवतां
विशिष्टता वा क्षतिर्वा ?

## २. विवशता

**गूर्जरमूलम् –**

### मोहताज

मदनकुमार अंजारिया 'ख्वाब'

रस्तानी
लाचारी तो जुओ,
पोते क्यांय
जवा माटे छे, के
पाछा वळ्वा माटे ?
– एनो आधार तेणे
पसार थनार पर
राखवो पडे छे !

**संस्कृतानुवादः**

मार्गस्य
विवशता तु दृश्यताम् !
स कुत्रचिद्
गमनार्थमस्ति वा
प्रतिनिवर्तनार्थं वा ?
– इत्येतत्तु
पथिकम्
अवलम्बते खलु !!

## ३. सुखम्

**गूर्जरमूलम् –**

### सुख

मदनकुमार अंजारिया 'ख्वाब'

अजवाळुं
खरीदी शकातुं होत
तो धनवानो
छेवटे तरसता होत
अंधारुं खरीदवा माटे !

**संस्कृतानुवादः**

प्रकाशो यदि
क्रेतुं शक्योऽभविष्यत्
तदा हि धनिकाः
किन्तु समाकुला अभविष्यन्
अन्धकारं क्रेतुम् !!

## ४. भयम्

**गूर्जरमूलम् –**

### बीक

भाग्येश जहा

“एने
मरणनी असर नथी थती,
स्मरणनी पण असर नथी,
वरसादमां पलळे न उस्सरे कशुं
उत्सव जेवुं पण न प्रगटे कशुं एनामां
आनन्द के आंसुनुं पण
नथी नामोनिशान आना चहेरा पर,
मने बीक छे
के
आपणा नगरने चार रस्ते ऊभेली
आ
प्रतिमा
क्यांय माणस न थई जाय”

**संस्कृतानुवादः**

“तस्यां
मरणेन न कोऽपि विशेषो जायते,
स्मरणेनाऽपि विशेषो नैव जायते,
वर्षासु भवन्ती आर्द्राऽपि न किञ्चिदाधानक्षमा
ततश्च, उत्सवादिकमपि न किञ्चित् प्रकटति तस्याम्,
आनन्दोऽश्रूणि वाऽपि
तस्या वदने लेशमात्रमपि न दृश्यन्ते,
मम भयमस्ति
यद्
अस्माकं नगरस्य मार्गचतुष्कमध्ये स्थिता
एषा
प्रतिमा
जातु मनुष्यस्तु न भविष्यति किल !!”

(सौजन्यम् –
**कविता**-२६६ – द्वैमासिकी गूर्जरकाव्यपत्रिका)

काव्यानुवादः

# हाईकुसप्तकम् ।। सानुवादम्

**डॉ. वासुदेवः पाठकः 'वागर्थः'**

- निर्लेप रहुं;
  वादळ आवे जाय;
  व्योम समो हुं.

- स्याम् नु निर्लेपः
  यान्त्यायान्ति मेघाः,
  व्योमवदहम् ।।

- अस्त पामतो
  सूर्य पण पश्चिमे;
  उदय न त्यां.

- गत्वा पश्चिमे
  सूर्योऽप्यस्तमेवैति;
  नोदयस्तत्र ।।

- उत्तम मित्र
  दर्पण; रडुं त्यारे
  हसे नहीं ए.

- उत्तमं मित्रम्
  दर्पणः, रोदने मे
  नैव हसति ।।

- दुःखसागर
  करुं हुं आचमन
  बनी अगस्त्य.

- दुःखार्णवस्य
  आचमनं करोमि
  अगस्त्यो भूत्वा ।

- अस्थिर जळे
  प्रतिबिंबित चन्द्र
  झंखे स्थिरता !

- अस्थिरे जले
  प्रतिबिम्बितश्चन्द्रः
  स्थैर्यमाकाङ्क्षन् !

- सक्षमाधार
  पडशे ना आकाश;
  वधतां वृक्षो.

- सक्षमाधारः,
  पतिष्यति नाऽऽकाशम्
  वर्धन्ते वृक्षाः ।।

- पोतानुं गणी
  खूब सजाव्युं घर;
  थै ट्रान्सफर ?

- मत्वा स्वकीयम्
  सु-संस्कारितं गृहम्;
  किं स्थानान्तरम् ?

# अनुभूतिः

**अनुवादकः मुनिधर्मकीर्तिविजयः**

['लंडन'देशस्य सर्वोच्चन्यायालयस्य 'सर-रेन्टुल' इत्यनेन न्यायमूर्तिना स्वजीवनकाले मानवस्य चतुर्दश प्रधानाः स्खलनाः याः स्वानुभूतास्ता अत्र वर्ण्यन्ते ।]

१. स्वकीयानन्दस्याऽनुसारेणाऽन्यजनस्याऽऽनन्दस्याऽपि कल्पनम् ।

२. बालकेभ्यः सकाशादप्युत्तमानामनुभवानामाशासनम् ।

३. सर्वेषां जनानां स्वभावः समानोऽस्तीति मननम् ।

४. लघ्वीष्वपि घटनासु स्वस्खलनाया नाऽङ्गीकरणम् ।

५. कृतायाः स्खलनायाः प्रतीकारकरणं तथा तदर्थं कुतर्काणां चिन्तनम् ।

६. अन्यजनस्याऽशक्तिर्न क्षन्तव्या ।

७. आत्मना यत् कर्तुं न शक्यं तत् सर्वं सर्वैरपि अशक्यम् - इति कल्पनम् ।

८. स्वदृष्ट्या यत् स्वीकृतं तदेव सत्यम् - इति मननम् ।

९. साम्प्रतं या परिस्थितिरस्ति साऽऽजीवनं स्थास्यतीति चिन्तनम् ।

१०. मानवस्याऽऽन्तरिकगुणानुपेक्ष्य बाह्यगुणावगुणानामाधारेण तस्य चरितस्य निर्णयनम् ।

११. शक्तौ सत्यामपि परस्य दुःखानि दूरीकर्तुं न प्रयतनम् ।

१२. स्वविचारधारानुरूपेण सत्यस्याऽसत्यस्य चाऽवधेः कल्पनम् ।

१३. स्वकार्यं तु परिपूर्णं योग्यं चैव स्यादिति मननम् ।

१४. सर्वे जना एतावत् कथनं स्वीकुर्युरेवेति निश्चयनम् ।

# यथार्थमानवः

**अनुवादकः मुनिधर्मकीर्तिविजयः**

**( गूर्जरमूलम् - अज्ञातम् )**

यदा ते सर्वाणि मित्राणि
धैर्याद् विचलितानि स्युरेवं
तवोपरि दोषारोपणं कुर्युस्तानि,
तदाऽपि धैर्यमालम्ब्य त्वं स्वस्थीभवेः,
एवंकरणेऽपि नोद्विग्नो भवेः;
अन्येषां तिरस्कारानपि
सानन्दं सोढुं शक्नुयास्त्वम्;
स्वप्नसेवी भवन्नपि त्वं स्वप्नाधीनो न भवेः;
विजये पराजये वा
मनसः संतुलनं रक्षेस्त्वम्;
तव आवश्यकानि कर्तव्यानि निष्ठापूर्वकं कर्तुं त्वं समर्थो भवेः,
सर्वजनैः सह संमीलनेऽपि त्वं
स्वव्यक्तित्वं संधारयेः,
महानुभावानां समागमेनाऽपि
जनविमुखो न स्यास्त्वम्
तदा निखिलाऽपि पृथ्वी तवैवाऽस्ति
एकस्त्वमेव यथार्थमानवोऽसि ।

अनुवादः

# भोपालवायुदुर्घटना★

मूललेखकः **कर्नल चन्द्रप्रशङ्कर-बक्षी**
अनुवादकः **मुनिकल्याणकीर्तिविजयः**

अस्माकं जीवने बह्व्यो घटना घटन्ते । काश्चन शुभाः काश्चिच्च अशुभाः । किन्तु ताः सर्वा अपि कार्यकारणभावान्विता एव घटन्ते । आकस्मिकं तु नैव किञ्चिद् भवति । सर्वासामपि घटनानां मूलं कुत्रचिद् भवत्येव, कदाचिच्च जन्मान्तरेऽपि तत् स्यात् । तथा तासां घटनानां घटनाभिश्चाऽर्जितानां कर्मणां फलमपीह जन्मनि परत्र वा वेदनीयं भवति । यथोक्तं **पातञ्जलयोगसूत्रे** –

– क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ (२/१२)
– सति मूले तद्विपाको जात्यायुर्भोगाः ॥ (२/१३)
– ते आह्लाद-परितापफलाः पुण्यापुण्यहेतुत्वात् ॥ (२/१४)

भोपाल(गेस)दुर्घटनायामपि एवमेव कार्य-कारणभावेन सर्वं घटितम् । एकैकशः प्रसङ्गानां शृङ्खला तथा ग्रथिता यथा तस्या अन्तो विषमयवायुविस्फोटेऽवसितः । अस्मिन् प्रकरणे बहुशोऽयं कार्य-कारणसिद्धान्तो ध्यानार्हो भविष्यति । पश्यामस्तावत् अस्याः शृङ्खलायाः प्रथमं खण्डम् –

उडीसाराज्ये मुदिलापा नाम ग्रामः समस्ति । भारतस्य सहस्रशो ग्रामवद् अत्यन्तं दुर्गत एष ग्रामः । अत्र केवलं षष्टिर्गृहाणि सन्ति । भृशं दारिद्र्यपीडिताः सन्तो अत्रत्या जना जीवननिर्वाहार्थं कार्यमन्वेष्टुं यत्र तत्राऽटन्ति । यदा च कार्यं न प्राप्यते कुत्रिचत् तदाऽत्यन्तं दीना वराकाश्चैते एकं स्वीयमपत्यं - विशेषतः पुत्रीम् - अल्पधनार्थमेव विक्रीणन्त्यपि ।

बालकानां शैशवमपि कराला दरिद्रता निगिलति । यत आबाल्यादेवोदरदरीपूरणार्थं पितृभ्यां सार्धं यत्किञ्चिदपि कार्यं तैः कर्तव्यमेव । निर्दया जनाश्च अल्पतमवेतनदानेन बालकैः स्वीयकार्यं कारयन्ति। तदपि चाऽत्यधिकं कारयन्ति । बहवो बालकाः कार्यं कुर्वाणा रुग्णा भवन्ति, औषधादीनां चाऽभावे म्रियन्तेऽपि । वराकौ पितरौ किं वा कुर्यातां, कस्मै वा कथयेताम् ?

तदात्वे प्रधानमन्त्रिपदे स्थितायै श्रीमतीइन्दिरागान्धिमहोदयायै कश्चन मुदिलापाग्रामवासिनां दुर्दशामकथयत् । तयाऽपि तेषां दुःखेन दुःखितया करुणाप्रेरितयाऽऽदिष्टमधिकारिणां – ग्रामेऽस्मिन् प्रतिगृहं जनेभ्यो निःशुल्कमेका गौरेकं च क्षेत्रं दातव्यम् । क्षेत्रे धान्यादिवपनार्थं धनमपि दातव्यम् - इति ।

★ अयं हि लेखः केवलं वृत्तावबोधनार्थमेवाऽनूदितोऽस्ति । नास्त्यस्माकं केनाऽपि सह व्यक्तिगतो राग-द्वेष-मात्सर्या-दिसम्बन्धः ।

(इदमासीत् शृङ्खलायाः द्वितीयं खण्डम् ।)

दुर्गतास्ते ग्रामजनाः सर्वमप्येतत् प्राप्य अतीव हृष्टा जाताः । स्वेष्टदेवं जगन्नाथं प्रणमद्भिस्तै-र्भृशमुत्साहेन स्वस्वक्षेत्रेषु धान्यं तृणादि चोप्तम् । ततश्च प्रत्यहं विवर्धमानान् स्तम्बान् विलोक्य मोदन्ते स्म ।

अथ चैकस्मिन् दिने किञ्चिदनपेक्षितं घटितम् । यदा हि तैर्ग्रामजनैः क्षेत्राणि गत्वा विलोकितं तदा सर्वेऽपि स्तम्बाः सहस्रशो जन्तुभिर्विनाश्यमाना दृष्टाः । श्यामवर्णकैर्लघुलघुभिः सहस्रशो जन्तुभिः प्रत्येकं स्तम्ब आमूलं विनाशित आसीत् । जनास्तु व्याकुलहृदयाः सर्वमपीदं भगवत्कोपं मन्यमाना भगवत्पुरतो बहूनि पूजोपयाचितादीनि कृतवन्तः, किन्तु भगवान् जगन्नाथः प्रसन्नो नैवाऽभवत् ।

वस्तुतस्तु ये जन्तवो मृत्युदूता इव प्रतिक्षेत्रं प्रतिस्तम्बं चाऽभिव्याप्य सर्वमपि विनाशयन्ति ते वैज्ञानिकैः एफिड्स (Aphids) इति नाम्ना उपलक्षिताः सन्ति । अत्राऽपि तैरेव जन्तुभिः सर्वं विनाशित-मासीत् । एतेन ते दुर्गता जना निराशतया रुदन्तः स्वभाग्यं निन्दितवन्तः । (इदं शृङ्खलायास्तृतीयं खण्डम् ।)

वनस्पतीनां शत्रव इवैते जन्तवः कति सन्तीति ऊहितं कदाचित् ? अद्यावधि पञ्चाशीतिः सहस्राणि जन्तूनां जातयो वैज्ञानिकैरभिज्ञाताः सन्ति ।

तेषामन्यतमस्य ब्लेक-एफिड्स-इतिनाम्नो जन्तोरुपद्रवो मुदिलापाग्रामे इव उडीशाराज्यस्या-ऽन्यस्मिन्नपि विशालप्रदेशेऽभिव्याप्तः सर्वत्र च दुष्कालतुल्यपरिस्थितिमजनयत् । वार्ता चैषा सर्वत्र जगति प्रसिद्धा ।

यद्यपि क्षेत्र-धान्यादिरक्षणार्थं जन्तुनाशकानि रसायनानि निर्मीयन्ते एव, उपयुज्यन्ते चाऽपि । किन्तु गच्छता कालेन तेषां प्रभावोऽल्पीभवति तथा प्रभाव इव कुप्रभावोऽपि धान्ये पशु-पक्षिष्वन्यजन्तुषु च भवति ।

अथ च वार्तामेतां श्रुत्वा अमेरिकादेशस्य विलियम-बोइसथोम्सन नाम्नो धनपतेर्मनसि भावनो-त्पन्ना यद् मदीयं धनं यद्येतेषां दरिद्रजनानां साहाय्यार्थमुपयुज्येत तदा वरम् । किन्तु एवमेव धनसाहाय्यं न कर्तव्यमपि तु तादृशं रसायनं संशोधनीयं यदुपयोगेनैते जन्तवो विनाशिता भवेयुर्धान्यं च रक्षितं स्यात्। अतस्तेन वैज्ञानिकेभ्य एतदर्थं विज्ञप्तिः कृताऽनुदानं चोद्घोषितम् । एतेन बहवो वैज्ञानिका विशेषतस्तु अमेरिकादेशस्य कार्बाइडसंस्थाया वैज्ञानिका एतद्रसायनसंशोधनार्थं प्रयोगरताः सञ्जाताः । तैर्हि स्वप्रयोगशालायां भारतदेशस्थं वातावरणं कृत्रिमतया सृष्ट्वा ताः सर्वा अपि वनस्पतयस्तत्रोत्पादिताः, या ब्लेक-एफिडस्-जन्तुभिरुपद्रूयन्ते, तासु च विविधरसायनानां प्रयोगाः कृताः । (शृङ्खलावृद्धिः जाता ।)

बहुभिः प्रयोगैस्तैरुपलब्धं यद् - यदा फोस्फरसपदार्थजनितो भयङ्करः फोस्जीनवायुः मोनोमिथि-ल्माइनवायुना मेल्यते तेन च सह आल्फा-नेफ्थॉलरसायनं यदा मेल्यते तदा भयङ्करं जन्तुनाशकं रसायनं 'सेविन' (Seven) नामकमुत्पन्नं भवति । अस्या रासायनिकं नाम मिथैल-आइसोसायानेट (Methyl

Isocyanate)- इत्यस्ति । तन्नामाऽस्मिन् रसायने साइनाइड-नामकं विषमस्ति । जगत्येवेदृशं भयङ्करं जन्तुनाशकं रसायनमद्यावधि केनाऽपि समुत्पादितं नाऽऽसीत् । मनुष्य-पशु-पक्षिणामुच्छ्वासे यद्यस्य रसायनस्यांऽशोऽपि प्रविशेत् तदा तत्क्षणमेव मृत्युर्भवेत् । भाग्ययोगेन यदि कश्चन जीवितस्तिष्ठेत् तदाऽपि तस्य त्वग् विनश्येदन्धत्वं वा स प्राप्येत् । (अयमासीत् शृङ्खलाया अन्यतमो मुख्योंऽशः ।)

रसायनं तूत्पन्नं, किन्तु भारतदेशे तस्य प्रेषणं भयजनकमासीत् । अतो वैज्ञानिकैः कार्बाइड-संस्थामुख्यानां कथितं यद् - यदि भारतदेशे एव कुत्रचित् रसायनमिदमुत्पाद्येत विक्रीयेत च तदा सुरक्षादृष्ट्या वरम् । संस्थामुख्येभ्योऽपि इदमेव रुचितम् । यद्यपि संशोधकवैज्ञानिकैः स्वीयनिवेदने स्पष्टतया प्रामाणिकतया च लिखितमासीत् - यद् - रसायनमिदं सर्वथा विषमयं जीवनहानिकरं च । तथा यद्यप्यस्मिन् हायड्रोजन-साइनाइड-नामकं विषमस्ति तथाऽप्यस्य प्रभावादनुक्षणमेव यदि थियोसल्फेट-औषधं सूचीप्रयोगेण दीयेत तदा प्राणहानिर्निवारिता स्यात् । किन्तु कार्बाइडसंस्थाया धनलोलुपैः कार्यकर्तृभिः सर्वमपि तथ्यमेतत् सर्वथा गोपितम् । रसायनस्योत्पादनविधिपत्रे उपयोगपत्रे वाऽपि तथ्यमिदं नैव निर्दिष्टम् । (शृङ्खलेयं कथं वर्धते इति द्रष्टव्यम् ।)

कार्बाइडसंस्थामुख्यैर्भारतदेशे कुत्र स्थाने उद्योगोऽयं स्थापयितव्यः - इति समीक्षितुं स्वीयप्रतिनिधिः एडुआर्डो-मुनोसनामकः प्रेषितः । सोऽपि अत्राऽऽगत्य बहूनि स्थानान्यटितवान् । यदा स मध्यप्रदेशे भोपालमहानगरं प्राप्तस्तदा तत्र सर्वमपि स्वानुकूलं परिसरं दृष्ट्वा चिन्तितवान् यद् - इदमेवोद्योगस्थापनस्य योग्यं स्थानमस्ति । (विनाशकालः सन्निहितो भवन् लक्ष्यते ।)

कार्बाइडप्रतिनिधिना तेन भोपालनगरे स्थिता दुर्गतानां वसतिः कथमपि वीक्षिताऽऽसीत् । एते दीन-दरिद्रा जना स्वल्पवेतनेनैवोद्योगालये कार्यार्थमवश्यमागमिष्यन्तीति तेनाऽवगतमासीत् । अतस्तेन संस्थाधिकारिण एतदर्थं निवेदिताः । तैरपि भोपालनगरं गत्वा सर्वोऽपि विधिः साधितः । (भारतदेशे धनबलेन यत्किमपि कर्तुं शक्यमेव - इति तु नाऽविदितं सर्वेषाम् ।) उद्योगालयो भोपाले स्थापयिष्यते - इति ज्ञात्वैव कर्मकरनियोक्तारः (Contractor) उडीशाराज्यं प्रति धाविताः । तत्र तु दुर्भिक्षमेवाऽऽसीत्, अतः - भवद्भ्यो भोपालनगरे वृत्तिर्लप्स्यते — इति कथयित्वा शतशो दुर्गतजनान् ते भोपालनगरमानीतवन्तः । एतेषु मुदिलापाग्रामजना अप्यासन् । सर्वेऽपि एते जना उडीयाजनानां दुर्गतवसतौ समाविष्टाः कथमपि । तेषां तु कल्पनैव नाऽऽसीद् यत् करालः काल एव तानत्राऽऽनीतवानस्ति ।

कार्बाइडसंस्थाधिकारिणस्तु प्रवृत्तं सर्वमपि विलोक्याऽतीव प्रमुदिता जाताः । अल्पविनियोगेना-ऽधिको लाभो भवितेत्यवगम्य तेषां हर्षस्याऽवधिरेव नाऽऽसीत् । संस्थाया न्यायसचिवैः सूचितमासीत् यद् - रसायनकूप्या उपरिभागे नरकपालस्य अस्थिद्वयस्य च चित्रं मुद्रयितव्यं, तदधस्तात् 'भयजनकम्' इति तथा 'रसायनमिदं यदि श्वासे प्रविशेत् तदा दुष्परिणामा भवन्ति' इत्यपि मुद्रयितव्यम् । अनेनाऽस्माक-मुत्तरदायित्वं न भवेत् । धनलालसैः संस्थामुख्यैर्यथातथं विहितमेतत् । तैर्ज्ञातमेवाऽऽसीत् यद् - भारते बहुशो जनाः पठितुमपि न जानन्तीति ।

वैज्ञानिकैस्तु स्वनिवेदने इदमपि लिखितमासीत् – ''यदि रसायनस्याऽस्य प्रतिक्रिया आरब्धा भवेत् तदा सा कथमपि निवारयितुमशक्यैव। रसायनमिदं सर्वथा जीवनहानिकरम्। अतोऽत्यन्तं सावधानतया निर्मातव्यं यत्नेन चोपयोक्तव्यमिति''। किन्तु संस्थामुख्यैर्निवेदनमिदं सर्वथाऽपह्नुतम्। यतो नरवृकाणामेषां धनाद् ऋते नाऽन्यत् किञ्चित् दृश्यते स्म।

भोपालस्थिते उद्योगालये त्वरया रसायननिर्माणं न सम्भवेत्, अतः प्राथम्येन तदुपयोक्तुममेरिका-देशादेव संस्थयाऽऽनायितम्। समुद्रमार्गेण तद् मुम्बईनगरे आगतम्। तस्योत्तरणार्थं च प्रान्तस्थित-माजी-उत्तरणस्थानं (port) समुचितमिति निश्चितम्। ततस्तद् रसायनं भोपालं प्रापयितुं कमल-परीखः तथा तत्सहायकः शकील-खुरेशी च द्वे ट्रक्याने गृहीत्वा तत्रैव प्राप्तौ। कमलपरीखेण कार्बाइडसंस्थायां विस्तरेण शिक्षा गृहीताऽऽसीत्।

यदा हि प्रवहणात् रसायनपात्राण्यवतारितानि तदैकतमं पात्रं गलद् दृष्ट्वा नौकासञ्चालकेन सूचितं यत् – तत् पात्रं समुद्रे प्रक्षेपणीयमिति। किन्तु कमलपरीखेण झटिति तं निवार्य तस्य पात्रस्य गलनं केनचित् संश्लेषकपदार्थेन निरुद्धम्। अतिभयङ्करोऽपघातः क्षणार्धेन निवारितस्तेन। (किन्तु आगामिनो महापघातस्य भूमिकाऽपि सज्जीकृता एतेन।)

ततो द्वाभ्यामपि परीख-खुरेशीभ्यां सावधानतया रसायनपात्राणि भोपालनगरे प्रापितानि। कतिपयदिनैरेवोद्योगालयनिकटस्थकूपाद् विचित्रो दुर्गन्धो निःसर्तुमारब्धः। जनैरवगतं यत् कूपजलमवश्यं प्रदूषितमस्तीति। द्वि-त्रदिनेषु व्यतीतेष्वेव वसतौ विद्युत्पात इव सञ्जातः। प्रदूषितं जलं पीत्वा वसतेः सर्वा अपि गावो मृताः। जनाश्चिन्तिता अभवन् – 'अद्य गावो मृताः, श्वो वयम्'। जनानामत्याग्रहवशादु-द्योगालयव्यवस्थापकैः कूपजलपरीक्षणं कारितम्। परीक्षणेन ज्ञातं यत् कूपजलं सर्वथा विषमयं सञ्जातमस्तीति। किन्तु व्यवस्थापकैः सर्वथा तत् संगोप्य जनेभ्यो यथाकथञ्चिदुत्तरं प्रदत्तम्।

उद्योगालयनिकटे एव कालीमैदान-नाम स्थलमासीत् यत्र शतशो जना वसन्ति स्म। वोरनवूमर-नामकेन अमेरिकीयाधिकारिणा एतद् दृष्ट्वा चिन्तितेन जनानां स्थलान्तरं कारयितुं तत्कालीनमुख्यमन्त्रिणे अर्जुनसिंहाय निवेदनं कृतम्। अर्जुनसिंहस्य तु आगामिनिर्वाचने तेषां जनानां मतप्राप्तेराशाऽऽसीत्। यद्येते जना इतो निर्वास्येरन् तदा साऽऽशा धूलिसाद् भवेत्। अतः अर्जुनसिंहेन तद् निवेदनमपि संगोपितम्। एते अमेरिकीया अधिकारिणस्तेन सह मित्रतासम्बन्धेन बहुशो मिलन्ति स्म। एतत्सम्बन्धस्योपयोगं कृत्वा अर्जुनसिंहस्तन्निवेदनं निगिलितवान्। (सर्वं कथं क्रमशो घटितं तन्निरीक्षणार्हम्।)

भोपालस्थे उद्योगालये दि० ४/५/१९८० तमे दिने औपचारिकतया सेविनरसायनोत्पादनं प्रारब्धम्। तदात्वे एव राजकुमार-केसवाणीनामकेन सिंधीयगृहस्थेन **रपट-वीकली**(Rapat Weekly)नामकं साप्ताहिकवृत्तपत्रं प्रकाशयितुमारब्धमासीत्। तेन सद्य एवाऽवबुद्धं यदयमुद्योगालयो जनहितविनाशकोऽस्ति। तत्र यद् रसायनं निर्मीयते तदतीवविषमयं मनुष्याणां सर्वथा हानिकरं चाऽस्ति। केसवाणीमित्रमशरफनामक-मुद्योगालये वायुगलनं रोद्धुं यदा गतस्तदा वायुस्तस्य श्वासे प्रविष्टः, स च मृतः। एतेन केसवाणी अत्यन्तं

क्रुद्धः सन्नुद्योगालयस्य सर्वमपि वृत्तं ज्ञात्वा तद्विरोधार्थं स्वीयवृत्तपत्रे लेखान् लिखितुमारब्धः । तेन लिखितं यद् — 'भो भोपालवासिनः ! कार्बाइडसंस्था सर्वथा विषमयी विनाशकारिणी चाऽस्ति । कृपया जागरिता भवन्तु, नगरं च रक्षन्तु' । किन्तु केन्द्रसर्वकारः, राज्यसर्वकारः, अधिकारिणः, लोकनेतारः, शिक्षिताः जनाः - इत्येतेषामन्यतमेनाऽपि दुर्भाग्यात् तस्य लेखान् प्रति लक्ष्यं न दत्तम् ।

तथाऽपि स निराशोऽभूत्वा पुनः पुनर्लिखितवान् — 'भो भोपालवासिनः ! अद्य वयं भयानक-ज्वालामुखोपर्युपविष्टाः स्मः । यदा स ज्वालामुखः स्फुटितो भविष्यति तदा समग्रमपि भोपालनगर-मुद्योगालयो विनाशयिष्यति । नगरमिदं मृतकानां नगरं भविष्यति !!'' किन्तु सुषुप्तं सर्वकारतन्त्रं, प्रमत्ता मन्त्रिणः, धनलोलुपाः संस्थाव्यवस्थापकाः — को वा केसवाणीवचनानि शृणोति ?

तस्य स्पष्टवचनानि न केनाऽपि लक्षितानि, प्रत्युत संस्थाया मिथ्याप्रचारः सफलोऽभवत् । सर्वकारं जनांश्च प्रतारयन्ती सा सर्वदा कथयन्ती आसीत् - अस्माकमुद्योगालयः सर्वथा सुरक्षितोऽस्ति, निर्दुष्टं च सर्वमप्यत्रोत्पादनमस्ति - इत्यादि ।

मन्त्रिभिरपि कैश्चित् तत्समर्थनं कुर्वद्भिर्घोषितम् — अत्र यो वायुरुत्पाद्यते स सर्वथा निर्दोषो हानिरहितश्चाऽस्ति । अतोऽत्र चिन्तायाः कारणमेव नाऽस्ति - इत्यादि ।

एतत् सर्वं श्रुत्वा केसवाणी अतीव क्रुद्धो जातः । किन्तु स एकलः किं वा कुर्यात् ? तथाऽपि तेन कार्बाइडसंस्थायाः सर्वमपि दुष्टत्वं भयजनकत्वं च पत्रे विलिख्यैकं पत्रं सर्वोच्चन्यायालयस्य मुख्यन्यायाधीशं प्रति, अन्यच्च मुख्यमन्त्रिणेऽर्जुनसिंहाय प्रेषितम् । किन्तु जनतादौर्भाग्येण मुख्यन्यायाधीशेन तदवगणना कृता, अर्जुनसिंहस्तु अमेरिकीयाधिकारिणां मित्रतया सर्वथा पत्रमिदमुपेक्षितवान् । (नूनं कालस्य गतिरचिन्तनीया ।)

भारतदेशो हि कृषिप्रधानोऽस्ति । कृषिश्च मुख्यतया वृष्टिमेवाऽवलम्बते । भोपाले संस्थाया उद्योगालयारम्भानन्तरमेव देशे बहुत्र विभागेषु वृष्टिरल्पीयसी जाता । तेन कृषिरपि मन्दीभूता । ततश्च रसायनविक्रयणमपि स्थगितम् । एतेन उद्योगालये तदाधिक्यं जातम् । अतो व्यवस्थापकैः सुरक्षायाः सर्वामपि सीमानमुल्लङ्घ्य चत्वारिंशत्-टन-मितो वायुर्यत्र मायात् तादृशानि त्रीणि सञ्चयस्थानानि (Tank) कारितानि ।

यद्यपि वोरनवूमराभिधोऽमेरिकीयोऽधिकारी अतीव प्रामाणिको नियमपालनस्य चाऽऽग्रही आसीत् । सुरक्षाविषये तेन सर्वेऽपि अधिकारिण व्यवस्थापकाश्च दृढतया सूचिता आसन् यद् - एकं सूक्ष्मकीलकमपि शिथिलं न भवेत् - इति भवद्भिः सर्वदा निरीक्षणीयम् । किन्तु धनलोलुपानां तेषां विवेक एव विनष्ट आसीत् । अतस्तैस्तस्य वचनेऽवधानमेव न दत्तम् । स तु अधिकारी कार्यवशात् स्वदेशं प्रतिनिवृत्तः ।

किञ्च, यदा भोपालनगरे उद्योगालयं स्थापयितुं कार्बाइडसंस्थामुख्यैर्निश्चितं तदैव तेषां प्रतिनिधिना स्पष्टं कथितमासीत् यद् — ''भारतदेशे कृषिर्वृष्टिमेवाऽवलम्बते । अतो रसायनं सर्वदा विक्रेष्यते एवेति

निश्चितं नास्ति । तथा, अस्य सञ्चयोऽपि नोचितः सुरक्षादृष्ट्या । अतः प्रथममेव विचिन्त्य तदुत्पादनं कर्तव्यम्'' । किन्तु धनलोभिभिर्व्यवस्थापकैस्तत् सर्वं सर्वथोपेक्ष्योत्पादनकार्यं प्रवर्तितमेव । विज्ञापनैश्च जना अपि एतदुपयोगार्थमाकर्षिताः ।

किन्तु, तत् सर्वमपि विफलीकर्तुमिव तस्मिन् वर्षे मध्यप्रदेशराज्ये वृष्टिरेव न सञ्जाता । उत्पादनं तु नैव स्थगितमासीत् । अतस्तस्य सञ्चयं कर्तुं तैस्त्रीणि सञ्चयस्थानानि कारितानि यानि सुरक्षादृष्ट्या सर्वथाऽनुचितानि भयानकानि चाऽऽसन् । (प्रकृतेर्मनुष्यस्य चैकैकमपि पदं विनाशं प्रत्येव नयद् आसीद् अत्र ।)

अथ च संस्थामुख्यैरुद्योगालयस्य मुख्यनिर्वाहकपदे (Director) डी.एम.चक्रवर्तिनामा बंगीयजनो नियुक्तः । स हि सर्वथा निष्ठारहितो मद्यपश्चाऽऽसीत् । अनया नियुक्त्या सोऽतीव हृष्टो जातः । तस्यैतदुद्योगालयविषयकं रसायनसम्बन्धि च ज्ञानं नाऽऽसीदेव । सहैव स स्वं सर्वज्ञानसम्पन्नमप्य-मन्यत । अतोऽन्यनिर्वाहकैरधिकारिभिश्च सहैतद्विषयिकीं चर्चां कर्तुमपि सज्जो नाऽऽसीत् । निजवाक्यमेव प्रमाणमन्त्यसत्यं चेति स्वयममन्यत, अन्यानपि तदेव स्वीकारयितुं दुराग्रहोऽपि तस्याऽऽसीत् ।

द्वितीयो निर्वाहकस्तु ततोऽप्यग्रेसर आसीन्मूर्खत्वे । तस्य नाम आसीद् जगन्नाथ-मुकुन्दः इति । स सर्वदैव वातानुकूलिते स्वीये कार्यालये एवोपविशति स्म । उद्योगालयं निरीक्षितुमपि न गच्छति स्म, वस्त्रमालिन्यं स्यादिति भयात् !

दुर्भिक्षकारणात् रसायनविक्रयणं सर्वथा स्थगितं जातम् । अनेन व्यवस्थापकैश्चिन्तितं — 'यदि विक्रयणमेव न स्यात् तदोत्पादनस्य नाऽस्ति कश्चिद् अर्थः' इति । ततश्च तैस्तदुत्पादनं रोधितम् । बहवः कर्मिणोऽपि तैः कार्यच्युताः कृता येन व्ययोऽप्यल्पीभवेत् ।

एतैः सर्वैः कारणजातैरुद्योगालये सुरक्षानियमपालनमपि शिथिलं जातम् । नियतेषु निरीक्षण-परीक्षणेष्वपि उपेक्षणं वर्धितम् । त्रीणि सञ्चयस्थानानि त्वद्याऽपि पूर्णान्येव आसन् । उत्पादनेऽसति तेषु स्थितो विषमयो वायुरपि कुत्र व्यापार्येत ? इयं चाऽतीव भयङ्करी परिस्थितिरासीत् ।

अन्यपाश्चात्यदेशेषु यत्र यत्रेदं रसायनमुत्पाद्यते स्म तत्र यथाप्रयोजनमेव वायुरयं प्रगुणीक्रियते स्म । तत्सञ्चयं तु तत्रत्या जनाः स्वल्पमात्रमपि न कुर्वन्ति स्म । एतद्वैपरीत्येन भोपाले कार्बाइडसंस्था-व्यवस्थापकैः शताधिकटनमितो वायुः सञ्चित आसीत् । अत्यन्तं संवेदनशीला स्फोटका च परिस्थितिः-रासीदियम् ।

केसवाणी हि वृत्तपत्रमाध्यमेनैतद्विरोधं कर्तुं बहु पूत्कृतवान्, जनांश्च जागरयितुमत्यन्तं परुषशब्दैर्लेखान् लिखितवान् किन्तु सर्वोऽपि विनाशं प्रति धावन्निव तस्यैकमपि शब्दं श्रोतुं सन्नद्धः नाऽऽसीत् ।

इतश्च ताभ्यां द्वाभ्यामपि मूर्खशिरोमणिभ्यां निर्वाहकाभ्यां किमप्यचिन्तयित्वा विद्युतो व्ययं न्यूनं कर्तुमुद्योगालयस्य सर्वाऽपि सुरक्षाव्यवस्था निरोधिता । स्फोटकविषमयवायुभृतानि त्रीणि सञ्चयस्थानानि

सर्वदा शून्यांशमिते शैत्ये एव स्थापनीयानीति नियमोऽपि ताभ्यां भञ्जितः । वातानुकूलयन्त्रं वायुनाशनयन्त्रं (Flare) चाऽपि ताभ्यां सर्वथा स्थगितम् । अनेनोद्योगालये सर्वथा विनाशकारिणी परिस्थितिः सञ्जाता। किन्तु ताभ्यामेतत् किमपि न चिन्तितं सर्वथा ।

एतत् सर्वं ज्ञात्वा पुनरपि केसवाणी स्वीये वृत्तपत्रे पूत्कृतवान् – 'भो भोपालवासिनो जनाः ! अधुनाऽपि जागृता भवन्तु । कस्मिन्नपि क्षणे कार्बाइडसंस्थायां सर्वनाशकारी विस्फोटो भविष्यत्येव'। किन्त्वेकेनाऽपि जनेन सर्वकारीयाधिकारिणा वा तत्रावधानमपि न दत्तम् ।

(विनाशकाले विपरीता बुद्धिः स्यात् खलु !)

अन्ततस्तद्दिनमपि समागतम् । २/१२/१९८४तमे दिनाङ्के जर्मनीदेशात् बेयर्स (Bayers) संस्थायाः कश्चन रसायनतन्त्रज्ञोऽत्र भोपालनगरे कार्बाइडसंस्थायां कार्यवशादागत आसीत् । तेन तानि त्रीणि सञ्चयस्थानानि वायुपूर्णानि दृष्ट्वाऽतीव भयभीतेन संस्थाप्रतिनिधये उक्तम् – 'भोः ! किमर्थमेतावान् वायुरत्र सञ्चितोऽस्ति ? अयं न वायुरपि तु सर्वविनाशकोऽणुविस्फोटकः (Atom Bomb)' । किन्तु तद्वचोऽपि न केनाऽपि मनसिकृतम् ।

अथ च तस्यामेव रात्रौ यदा द्वादशवादनं जातं तदा तेषु सञ्चयस्थानेषु वायुसम्मर्दः (pressure) अत्यधिकं वर्धितः । (ननु कालराक्षसः जागृतः) । पञ्चाधिकद्वादशवादने च महता शब्देन सह प्रचण्डो विस्फोटो जातः । विषमयो वायुः सर्वत्र प्रसृतः । निकटस्थितायां वसतौ सुप्ताः स्त्री-पुरुष-बालकाः प्रायः त्रिंशत्सहस्रमितास्तु तत्क्षणमेव यमसदनं प्राप्ताः । सहस्रशो जना अन्धीभूताः, सहस्रशश्च विकलाङ्गा जाताः । सहस्रशो जनानां त्वक् तीव्रतया दग्धा । एतदुपर्यपि पञ्चलक्षमिता जना एतेन विस्फोटेन पीडिताः । एतत् सर्वं तु तदैव सञ्जातम् । परमद्याऽपि, ननु विंशतेर्वर्षाणामनन्तरमपि सहस्रशो जनास्तस्य वायोर्विषमयं फलं भुञ्जन्ति विविधपीडाव्याजेन ।

तत्र च मुख्यतया मस्तिष्करोगः सहस्रशो जनान् पीडयति । तथा बहवो जना नेत्र-क्लोम-स्नायु-यकृत्-मूत्रपिण्ड-सन्धिवातादिभी रोगैः पीडिताः सन्ति । एतेन तेषां शरीराणि मनांसि च दुर्बलानि जातानि। ते हि स्वीयं दैनन्दिनं व्यवहारं कर्तुमपि न शक्नुवन्ति ।

अन्यच्च विंशतेर्वर्षाणामनन्तरमपि कार्बाइडसंस्थाया उद्योगालयो यथातथमेव तिष्ठति । वायुविस्फोटानन्तरं तत्राऽद्यावधि न किञ्चित् शुद्धीकरणं मार्जनं वा कृतमस्ति । परिणामतस्तत्र समग्रेऽपि परिसरे समीपस्थेषु च कूप-तडागादिजलाशयेषु प्राय एकविंशतिविधानि विषमयानि रसायनानि विद्यन्ते। एतेन तत्रत्यं वातावरणमद्याऽपि प्रदूषितमेवाऽस्ति । जले च पारदस्य प्रमाणमपि सामान्यतः सप्ततिगुणित-मधिकं विद्यते । समीपस्थेषु क्षेत्रेषु यत्किञ्चिदप्युत्पाद्यते तदपि विषमयमेव भवति । अणुविस्फोटानन्तरं प्रवर्तमानकिरणोत्सर्गवदत्राऽपि विषमयवायोरुत्सर्गोऽद्यावधि नैव शमितः । दुःखस्य विषयस्त्वयं यद् - ये केचन नवजाता बालकाः सन्ति तेषु कर्कट(cancer)रोगस्य प्रमाणमधिकमस्ति । तज्ज्ञा वदन्ति यद् -

रोगोऽयं मातुः स्तन्यपानेन भवतीति ।

तथाऽन्येऽपि बहवो जनाः कर्कटरोगेण पीडिताः पीड्यमानाश्च सन्ति । तेषां प्रमाणमद्याऽपि वर्धमानमस्ति । सर्वकारेण घोषितं यत् – कर्कटरोगग्रस्तानां निःशुल्कं चिकित्सा करिष्यते । परन्तु यो रोगी प्राथमिकस्तरे स्यात् सोऽपि निःशुल्कचिकित्सार्थं तत्र गतः सन् शिथिलतन्त्रेण बहुकालं विलम्बं प्राप्य तृतीयस्तरं प्राप्यैवमेव म्रियते ।

बहुभिः संशोधकैः कथितमस्ति यत् प्रदूषितफल-धान्यादिभक्षणेन कर्कटरोगोऽत्र वर्धमानोऽस्ति । तथाऽपि मध्यप्रदेशीयः सर्वकारः स्वीयदायित्वाद् विमुक्तीभवितुं कथयति यत् — ''कर्कटरोगस्तु तमाखु-सेवनेन भवति'' । परन्तु स न चिन्तयति यत् स्तन्यपायिनो बालाः कुत्र तमाखुसेवनं कर्तुं गताः – इति ?

अथ च कार्बाइडसंस्थाया अमेरिकीयः प्रमुखो वॉरन-एन्डरसनः ६-१२-१९८४तमे दिनाङ्के (विस्फोटानन्तरं तृतीये दिने) भोपालं प्राप्तो विमानयानेन । तेन सह तस्य भारतीयसहायकौ गोखले-महिन्द्रौ चाऽप्यास्ताम् । विमानस्थानके एव ते त्रयोऽपि रक्षकदलेन बन्दीकृताः । न्यायाधीशेन च ते विविधै-र्दोषारोपैरारोपिताः, आजन्मकारावासं यावच्च तेषां दण्डो विधीयते – इत्यपि सूचिताः । तथा कथञ्चिदपि तेषां मुक्तिर्नैव स्याद् – इत्यपि तेभ्यः कथितम् ।

किन्तु घण्टात्रयानन्तरमेव अमेरिकीयसर्वकारनिर्बन्धेनाऽस्माकं भीरुः सर्वकारस्तं ससम्मानं मोचितवान् विशेषविमानेन च स्वदेशं प्रति प्रेषितवान् । एतज्ज्ञात्वा जनतया वृत्तपत्रैश्च बहुर्विरोधः कृतः पूत्कृतं च बहुशः, किन्तु सर्वमपि निष्फलं जातम् । भारतीयविदेशमन्त्रिणा अमेरिकीयसर्वकाराय सशपथं कथितमासीद् यद् एन्डरसनस्य केशोऽपि न उच्छेत्स्यते । (राजकार्ये मुख्ये जाते न्यायं को वा पृच्छेत् ?)

किञ्च, अद्यावधि कार्बाइडसंस्थया विस्फोटग्रस्तानां कृते देयं धनं पूर्णतया न प्रदत्तम् । यच्च धनं तया सर्वकाराय प्रदत्तं ततोऽपि जनेभ्यः न प्राप्तम् । न जाने मध्ये एव कुत्र विनष्टं तत् । को वा पृच्छति सर्वकारं कार्बाइडसंस्थां वा ? पृष्टेऽपि च को वा समुचितमुत्तरं प्रदत्ते ? सर्वाण्यपि नैतिकमूल्यानि सर्वथा नष्टान्यस्माकं देशे इति प्रतीयते किल !

[मम तु सार्वदिकं निरीक्षणमस्ति यद् अमेरिकीयजनाः सर्वथा स्वार्थिनः सन्ति । निर्दयाश्चाऽपि सन्ति । ते यदपि कुर्वन्ति तत् सर्वं स्वार्थपुष्ट्यर्थमेव । जापानदेशे हिरोशिमा-नागासाकीनगरयोरुपरि बमप्रक्षेपणस्याऽऽवश्यकतैव नाऽऽसीत् । केवलमेतैः स्वार्थान्धैर्जनैर्जीवद्-बमपरीक्षणं कर्तुं तानि प्रक्षिप्तानि । फलतश्च लक्षशो जना मृताः । किन्तु अमेरिकीयानां मनसि तदर्थं पश्चात्तापलेशोऽपि नास्ति । इहाऽपि सहस्रशो जना मृता म्रियन्ते चाऽद्याऽपि, किन्तु तेषां न कश्चित् खेदः शोको वैतदर्थम् ! 'सर्वे म्रियन्तां नाम ! वयं किल तेषामुपयोगं कृत्वा सुखेन जीविष्यामः !' — इत्यस्ति तेषां मनोवृत्तिः । यावच्च वयं तेषां धनेनाऽऽडम्बरेण वा प्रभाविता भविष्यामस्तावत् त्वेषैव स्थितिः प्रवर्तिष्यते इति निश्चप्रचम् ।]

◇

## लेखकपरिचयः

लेखस्याऽस्य लेखको निवृत्तः सैन्याधिकारी लेफ-कर्नल-श्री**चन्द्रशङ्करः बक्षी** अस्ति। ऐसवीये १९१४तमे वर्षे राजकोट(गूजरात)नगरे गृहीतजन्माऽयं जनोऽद्याऽष्टानवत्यधिकवर्षायुरपि युवा एव। स्वजीवने सैन्याधिकारित्वं सैन्यस्यैव च गुप्तविभागस्य जोइन्टसाइफरब्यूरो-इत्यभिधस्योपनियामकपदं प्राप्य निवृत्तोऽयमध्यात्मप्रदेशस्याऽप्यधिकारी। आध्यात्मिकसाहित्यस्य तलस्पर्शितयाऽध्ययनेन प्रायोगिकाभ्यासेन च स्वजीवने तेन यदनुभूतं यच्च प्राप्तं तस्य निःष्यन्दरूपेणैकं पुस्तकं प्रकटितं **— वैश्विकचेतना** इत्यभिधम्। इदं च गूर्जरभाषायां लिखितमासीत्। जनैस्तत् पठित्वाऽऽह्लादितैर्विज्ञप्तं **—** सर्वेषां जनानामुपकारार्थमाङ्ग्लभाषायामप्यस्याऽनुवादः कर्तव्य - इति। तदा स्वयमेव बक्षीमहोदयेन आङ्ग्लभाषायामपि **Cosmic Consciousness** (CosCon) इति नाम्ना तदेव पुस्तकं पुनरपि लिखितम्।

तदनन्तरं तेनाऽन्यान्यपि दश पुस्तकानि लिखितानि येषु जीवनस्य बहूनि रहस्यानि प्रकटितानि। तत्र च कच्छप्रदेशस्य भूकम्पानन्तरं तेन तस्याऽन्यासामपि च दुर्घटनानामवलम्बनेन पूर्णाभ्यासपूर्वमिदं दशमं पुस्तकं **'नो'र्यां सरनामां नो'र्यां ठेकाणां'** (नष्टाः सङ्केताः नष्टानि स्थानानि) इत्यभिधं लिखितम्। अत्र पुस्तके तस्य मुख्यं लक्ष्यं हि सर्वत्र कार्यकारणभावस्य निश्चितमस्तित्वं भवत्येव - इति प्रकटनमस्ति। तं चाऽवलम्ब्य क्षणभङ्गुरमपि जीवनं सुन्दरतया जीवितुं शक्यमस्ति - इति चाऽत्र हार्दमस्ति। (अयं लेखोऽपि तस्मादेव पुस्तकात् गृहीत्वाऽनूदितोऽस्ति।)

इदमेव हार्दं मनसिकृत्य स एतावत्यपि ज्येष्ठवयसि युवजनानामपि ईर्ष्याकरं जीवनं सानन्दं जीवन्नस्ति।

◆ ◆ ◆

# मर्म गभीरम्

**मुनिकल्याणकीर्तिविजयः**

## १. दरिद्रः कः ?

एको युवा धनमदेनोन्मत्तो गर्विष्ठश्चाऽभवत् । एकदा स सद्गुरुमपि स्वीयधनाढ्यत्वदिदर्शयिषया-ऽवहेलनेच्छया च सम्प्राप्याऽविनीततया शिष्टाचारादि विनैव तदुपहासं कर्तुमारब्धवान् – 'भोः ! भवांस्तु सर्वथा दरिद्रः प्रतिभाति । भवत्समीपे किमपि प्रासादादिकं धन-धान्य-वाहनादिकं वा नैव विद्यते खलु !'

गुरुणाऽपि विहस्योक्तं – 'भोः ! अहं यदि भवते दरिद्रः प्रतिभामि तदा न काऽपि बाधा, किन्तु भवांस्तु नाऽस्त्येव दरिद्रः किल !!'

युवकः सगर्वमुक्तवान् – 'किं भवान् मामपि न परिचिनोति वा ? मम स्वाम्ये दशाधिका उद्योगालया वर्तन्ते येभ्यः प्रतिवर्षं कोटिशो रूप्यकाण्यर्जयामि । जगतः श्रेष्ठानि कार्-यानानि मम परिवहनाय सन्ति, विशालश्च हर्म्यो मे निवासाय कल्पितोऽस्ति । किङ्करा अपि मे वचोऽनुष्ठानाय शतशः सन्ति । सुखं जीवनाय यत् किमप्यावश्यकं तत् सर्वमपि मत्स्वाम्ये विद्यते । यद्यपि सर्वमप्येतत् कथयितुं नैवोचितं तथाऽपि भवतो ज्ञापनार्थमेवेयत् कथितम् । अन्यथा मम वैभवं त्वितोऽप्यनेकगुणितमस्ति' ।

एतन्निशम्य गुरुणा सस्मितमुक्तम् – 'एवं वा ! तर्ह्यहं मन्ये यद् भवत इतोऽप्यधिकस्याऽभिलाषो नैव स्यात्, एतावदेव पर्याप्तं स्यात् !' ।

तदोत्तेजितो युवाऽवदत् – 'किं वदति भवान् ? एतत् तु किमपि नास्ति । अहमितोऽपि सहस्रगुणितं धनमर्जयिष्यामि जगतोऽप्यधिकतया धनाढ्यो भविष्यामि - इति मे हार्दिकोऽभिलाषः' ।

गुरुः शान्त्याऽकथयत् – 'भवत्सकाशे एतावद् धनमैश्वर्यं चाऽस्ति तथाऽपि भवानेवं मन्यते यत् – मत्पार्श्वे किमपि नास्ति । तथा भवांस्ततोऽपि सहस्रगुणितमिच्छति । मम समीपे तु किमपि नास्ति, तथाऽहमितोऽपि किञ्चिन्नैवाऽभिलषामि । एवंस्थिते वदतु भवानेव – क आवयोर्दरिद्रः ? इति' ।

श्रुत्वैतत् सर्वथा लज्जितो युवकः स्वीयमज्ञानं प्रति हसितवान् गुरोश्च चरणयोर्वन्दित्वा क्षमां च याचित्वा ततो निर्गतः ।

''स भवति दरिद्रो यस्य तृष्णा विशाला'' ।

## २. चौर एव रक्षकः

एकदैकेन साधकेन मनश्चाञ्चल्यात् व्यथितेन सता मनसे एवाऽऽक्षेपपूर्णस्वरेण कथितं – 'भो मनः ! त्वमतीव चञ्चलमसि। त्वत्कारणान्मे कीदृशी बाधा जायते सर्वत्र कार्येषु ! मम सर्वाण्यपि कार्याणि तव चाञ्चल्यादेवाऽसिद्धानि वर्तन्ते। अतस्त्वं चाञ्चल्यं त्यक्त्वा शान्तं भव कृपया, येन मया सिद्धिर्लभ्येत'।

मनसोक्तं – 'भोः ! तव कार्याणामसिद्धेर्दोषं मयि नाऽऽरोपय। अत्र तु तवैव दोषोऽस्ति। त्वं कदाऽपि मय्यवधानं न ददासि, अत एवाऽहं चञ्चलमस्मि। अतः प्रथमं त्वमेव मद्विषयेऽवहितो भव येन चाञ्चल्यं स्वयमेव विनश्येत। चाञ्चल्यत्यागार्थं क्रियमाणा अन्ये सर्वेऽपि प्रयत्नास्तु विफला एव स्युः। अत्र विषये कथामेकां कथयामि। शृणु तावत्' –

'एकस्मिन्नगरे चौर एको नित्यं चौर्यकरणेन जनान् बहूपद्रवति स्म। रक्षका तं निग्रहीतुं बहु प्रयतन्ते स्म किन्तु स कथमपि नैव गृह्यते स्म। अतश्चिन्तिता जना राजानमुपेत्य तन्निग्रहणार्थं व्यज्ञपयन्। राज्ञा द्रुतमेव तन्निग्रहो भवितेति कथयित्वाऽऽश्वासितास्ते। ततो ''दृढां रक्षणव्यवस्थां कल्पयित्वा सत्वरमेव स चौरो निग्रहीतव्यः'' – इत्यादिष्टं मन्त्रिणे। किन्तु बहुभिरपि प्रयत्नैः स नैव हस्तगतोऽभवत्। अतो राज्ञाऽन्य उपायश्चिन्तितः। तेन स्वयमेव सर्वेक्षणं कृत्वा यस्याऽऽचरणं शङ्कास्पदमासीत् तादृश एको जन आहूतः। वस्तुतः स एव चौर आसीत्। सोऽपि स्वस्मिन् शङ्का न स्यादित्येतदर्थमागतस्तत्र। राज्ञा च स सदयमुक्तः – 'भोः ! तव योग्यतां दृष्ट्वाऽहमतीव प्रसन्नोऽस्मि। अतो जनसेवार्थं ते आरक्षकपदं ददामि। इतः परं त्वया नगररक्षणं कर्तव्य'मिति। सोऽपि सर्वजनसमक्षं कथितमिदं श्रुत्वा प्रतिषेद्धुमशक्तो राजादेशं स्वीकृतवान् आरक्षकश्चाऽभवत्।

यत्प्रभृति स आरक्षकोऽभवत् तत्प्रभृति नगर्यां चौरोपद्रवः शान्तो जातः। चौरो यदि स्वयमेव रक्षकः स्यात् तदा कथं चौर्यं भवेत् !'।

कथामेनां कथयित्वा मनसोक्तं – 'भोः ! तस्य चौरस्येव त्वमपि स्वस्यैव रक्षको भव। जागरूकतया रक्षणं कुरु। ततोऽहं सर्वथाऽचञ्चलं शान्तमेव च दृष्टिगोचरं भवेयम्'।

साधकायैतत् मनसोक्तं सूचनं रुचितम्। स स्वयमेव स्वरक्षकोऽभवत्। मनः शान्तं जातम्। चाञ्चल्यं च विलीनमभवत्।

(द्वयोरपि हिन्दीमूलम् - सन्त अमिताभः)

## ३. व्याघ्रभयादपि राजभयं बलवत्तरम्

एकदा चीनदेशीयस्तत्त्ववेत्ता कन्फ्यूशियसः स्वशिष्यैः सह ग्रामाद् ग्रामं प्रवसन् आसीत् । तदा कस्यचिद् ग्रामस्य सीम्नि एका स्त्री सकरुणं विलपन्ती रुदती च तेन दृष्टा । अतः सञ्जातदयेन कन्फ्यू-शियसेनैको निजशिष्यस्तद्रोदनकारणं ज्ञातुं प्रेषितः । शिष्येण पृष्टा सा कथितवती – 'अत्र प्रदेशे व्याघ्रा बहवः सन्ति । प्रथमं ह्येकेन व्याघ्रेण मे श्वशुरो मारयित्वा भक्षितः । कतिचिद्दिनानन्तरमन्येन व्याघ्रेण मे पतिरपि मारितः । ह्यश्च मे पुत्रमपि व्याघ्रो भक्षितवान् । अतो रोदिमि' ।

एतच्छ्रवणेन शिष्यस्याऽपि नेत्रे दुःखेन बाष्पक्लिन्ने जाते । ततस्तेनाऽपि गत्वा स्वगुरवे कथितमेतत् । सोऽपि सञ्जातदयस्तत्पार्श्वे समागत्य तस्यै पृष्ट्वान् – 'भगिनि ! व्याघ्राणामेतादृशे त्रासे सत्यपि भवती कथमत्र प्रदेशे वसति ? अस्य त्यागं किमर्थं न करोति ?' स्त्रियोक्तं – 'तत् तु नैव शक्यम्' ।

'किमिति ?'

'अत्र प्रदेशे यद्यपि व्याघ्रत्रासोऽस्ति तथाऽप्यत्रैव वासः श्रेयसे । यतोऽत्रत्या राजपुरुषा अधिकारिण-श्चाऽत्यन्तं सुयोग्या न्यायिनश्च सन्ति । जनानां कल्याणमेव तेषां कृते प्राथम्यं भजति । अतो वयमत्रा-ऽत्यन्तं सुखिनः स्मः । अनेनैव कारणेन व्याघ्रभये सत्यपि वयमत्रैव वसामः' ।

एतन्निशम्य कन्फ्यूशियसः स्वशिष्यानुक्तवान् – 'दृष्टं किल भवद्भिः ? व्याघ्रभयादपि राजभयं बलवत्तरमिति' !!

## ४. भगवतः कार्यम्

कश्चनो जनः पर्यटनार्थं निर्गतः सन् कुत्रचिन्नूतनदेवालयनिर्माणं जायमानं दृष्ट्वा तद्विलोकनार्थं स्थितः । तेन दृष्टं यद् द्वौ शिल्पिनौ तत्र शिल्पकार्ये रताः सन्ति । स एकस्य पार्श्वे यावद् गतस्तावत्तेन निरीक्षितं यत् स शिल्पी अतीव श्रान्तः खिन्नश्च दृश्यते स्म, तस्य मुखमपि विच्छायमासीत् । अतः स तं पृष्टवान् – 'भोः ! किमर्थं भवान् श्रान्तोऽस्ति ? वदनमपि भवतो विच्छायमस्ति !' तेनोक्तं रूक्षतया – 'भोः ! पाषाणखण्डान् विदारयन् किमहं न दृश्ये वा ? प्रत्यहमेतादृशं कार्यं कुर्वन्नहमतीव श्रान्तोऽस्मि । तेनैव च मुखमपि म्लानम्' ।

ततः स जनोऽन्यस्य शिल्पिनः कार्यं द्रष्टुं यावद् गतस्तावत् तेन दृष्टं यदयमतीव प्रफुल्लितो दृश्यते । वदनमपि तस्य सुप्रसन्नं सस्मितं चाऽस्ति । अतो विस्मयापन्नः स तमपि पृष्टवान् – ''भोः ! किमर्थं भवान् अतीव प्रसन्नोऽस्ति ? वदनमपि भवतः प्रसन्नं मधुरस्मितपूर्णं च दृश्यते !' । तेनोक्तं सानन्दं – 'भोः ! भगवतः कार्यं कुर्वन् कोऽपि जनः प्रसन्न एव स्थातुमर्हति । एते पाषाणा हि साक्षाद् देवकल्पाः । अतः प्रत्यहं भगवतः कार्यं कुर्वन्नहमपि प्रसन्न एवाऽस्मि' ।

# अहो ! आश्चर्यम् !!!

**मुनिन्यायरत्नविजयः**

विश्वमध्ये केचन विशिष्टा जनाः वसन्ति । न ज्ञायते ते किमर्थमीदृशानि कार्याणि कुर्वन्ति परमस्माकमक्षीणि तु तच्छ्रवणेनैव विस्फुरितानीव भवन्ति, कथ्यते च – अहो ! आश्चर्यम् !!! – इत्यस्माभिः ।

विद्यन्ते जगत्यस्मिन् केचन् विरला जना ये – लोकमध्ये वयं विश्रुताः कथं भवेमेति मनसि सदैव चिन्ताकुलाः भवन्ति । एतदर्थं च ते यं यमुपायं समाचरन्ति तत् तु वयं विचारयितुमपि असमर्थाः ।

फिलिपाइन्सदेशमध्ये 'आर्मान्दो मार्तिनाला'नामा युवा वसति । तेन तु निमेषत्रयेणैव 'Capsicum frutescens'प्रजातेः पञ्चाशदधिकपञ्चशतानि हरितमरीचानि खादितानि । ईदृशाणां मरीचाणां कटुतायाः प्रमाणं त्रिंशत्सहस्राणि 'Scoville Unit' यावद् भवति ।

षड्वर्षपूर्वम् (७-४-२००५) अमेरिकादेशे 'चीली-चेम्पियन' इति विश्रुतेन 'मार्क-एलन'-नाम्ना साहसिकेनैकनिमेषमध्ये हालापेन्यो (Jalapeñoe) प्रजातेरेकादशमरीचानि खादितानि ।

अत्र स्मरणीयं यद् वयं यानि मरीचानि भक्षयामस्तेषां कटुतायाः प्रमाणं सार्धं सहस्रद्वयं (२५००) Scoville Unit यावद् भवति । 'हालापेन्यो'मरीचानां तु कटुतायाः प्रमाणमष्टौ सहस्राणि (८०००) Scoville Unit यावद् वर्तते ।

यद्यपि मार्क-एलनस्य पराक्रमोऽधिकसमयं नाऽतिष्ठत् । सप्तमासानन्तरमेव (२०-११-२००५) ओस्ट्रेलिया-वास्तव्यः 'स्टुअर्ट-रोसनामा साहसिक एकनिमेषेणैव तत्प्रजातेः पञ्चदश मरिचानि भक्षितवान् ।

अधुना तु यत्राऽस्माकं श्रद्धैव न भवेत् तादृशं दृष्टान्तं कथयितुमिच्छामि । भारतमध्ये आसामवास्तव्या अनान्दिता दत्ता तामुले-नाम्नी महिला रसनोपरि पतितान्यङ्गाराणीव कटुकानि 'भूत-जोलाकिया' नामानि मरीचानि केवलं निमेषद्वयेनैवैकपञ्चाशत्-प्रमितानि भक्षितवती । एतत्प्रजात्याः मरीचस्यैकं कवलमपि सामान्यजनो भक्षयितुमसमर्थः । यतो भूत-जोलोकियाप्रजातेर्मरीचस्य कटुतायाः प्रमाणं तु दशलक्षाधिकानि 'Scoville Unit' यावद् भवति ।

ईदृशमश्रद्धेयं कार्यं कृत्वाऽपि सा हताशा जाता । यतस्तस्या मरीचभक्षणस्य समये 'गिनेसबुक ऑफ वर्ल्ड रेकोर्डस्' इत्यस्य निरीक्षका अनुपस्थिता आसन् । तेनैव कारणेन तत्पराक्रमस्तन्मध्ये समाविष्टो नाऽभवत् ।

(**आधारः** गूर्जरभाषीया '**सफारी**' मासपत्रिका)

# रुग्णोऽहं जातः

**मुनिकल्याणकीर्तिविजयः**

प्रतिदिनमिव तद्दिनेऽप्यहं त्रिवादने पुस्तकालयं गतः । विविधपुस्तकानामवलोकने ममाऽभिरुचिर्वर्तते़ऽतः प्रत्यहमन्यान्यपुस्तकानि विलोकयामि स्म । तद्दिने मम हस्तयोर्वैद्यशास्त्रसम्बन्धि किञ्चित् पुस्तकमापतितम् । विलक्षणे तत्र पुस्तके विविधरोगाणामकारादिक्रमेण परिचयो लक्षणानि च वर्णितान्यासन् । यथाकथञ्चिन्मया तस्यैकं पत्रं समुद्घाट्य पठितम् । तस्मिन् पत्रे भस्मकरोगस्य वर्णनमासीत्। तत्र च तल्लक्षणानि मया पठितानि, यथा – 'अस्य रोगस्य प्रभावेण बुभुक्षाऽतीव वर्धतेऽतो रोगी वारंवारमन्नभक्षणं करोति, तच्चाऽन्नं शीघ्रमेव रोगिशरीरे जीर्यते' ।

एतत् पठित्वा मयाऽचिन्ति – 'एतानि लक्षणानि तु मय्यपि वर्तन्तेऽतो मन्ये यद् रोगेणैतेनाऽहं भृशमाक्रान्तोऽस्मी'ति ।

ततोऽन्यदपि पत्रं पठितम् । तत्र तृड्-रोगस्य लक्षणानि वर्णितान्यासन्, यथा – 'एतद्रोगवतो जनस्य पौनःपुन्येन जलपानेच्छा भवति, बहुशो जलपानेनाऽपि सा नैव निवर्तते ।' यद्यपि जलपानमधिकृत्यैतल्लक्षणं तु मयि नाऽऽसीत् तथाऽपि चाय्-पानमाश्रित्य तु भृशमासीत् । अतो मया चिन्तितं यदयमपि रोगोऽन्यतरप्रकारेण मयि विद्यत एवेति ।

अथ च रोगद्वयं मयि विद्यते इति ज्ञात्वा मया प्रथमत एव तत् पुस्तकपठनं प्रारब्धम् । ततश्च यज्जातं तदद्याऽपि यदा चिन्तयामि तदा भृशं हसामि स्वमेवाऽधिकृत्य ।

प्रथमम**जीर्ण**रोगवर्णनं पठितम् । तस्याऽन्यानि लक्षणानि तु यद्यपि मयि नाऽऽसन् तथाऽपि 'कार्यकरणेऽरुचि'रित्येकं लक्षणं तु मयि सर्वाङ्गव्याप्तमासीत् । **अग्निमान्द्य**स्य लक्षणानि तु भोजनानन्तरं घण्टाद्वयं वाऽनुभूयन्ते स्म । **अक्षिरोग**स्यैकं लक्षणं - वारंवारमक्षिनिमीलनरूपं तु मयि आविद्यार्थिकालात् शालायां पठनसमयेऽधुना च कार्यालये कार्यकरणकाले दृष्टिगोचरं भवति स्म । अत एतदपेक्षयाऽहमाविंशतेर्वर्षेभ्यो नेत्ररोगेणाऽऽक्रान्तोऽस्मि - इति मया चिन्तितम् । **बद्धकोष्ठ**(Constipation)रोगस्तु ममाऽऽजन्मसहयोगीति तल्लक्षणानि पठित्वाऽनुभूतम् । **निद्रातिरेक**रोगो हि मयि चरमदशावर्त्यस्तीति प्रतीतिर्जाता । तत आगतो **निद्रानाशः** । अयमेक एव रोग आसीद् यो मम कदाऽपि नैवाऽजायत । यतो मे निद्रानाशः कदाऽपि स्वतो नैव भवति स्म, अन्यप्रेरणयैव च भवति स्माऽत एतद्रोगविषये त्वहं सर्वथा निश्चिन्तो जातः । **मस्तकपीडा**ऽपि मम यदा चाय-पेयं न प्राप्यते तदा भवति स्मैव । **मेदोवृद्धि**रपि

कथञ्चिन्मम देहेऽवर्ततैव वर्धते स्म चाऽपि। समेषामप्येतेषां रोगाणां मम देहे सत्त्वमासीदेव, सहैव ये रोगा इतोऽप्यग्रे वर्णिता आसन् तेषां तु यद्यप्यन्यानि लक्षणानि मयि नाऽवर्तन्त तथाऽपि 'कार्यकरणेऽरुचिरालस्यं, नितान्तं स्वपनेच्छा' चे'ति लक्षणत्रयं तु मयि वर्तते स्मैव। अत एतावद्भिर्दुष्टरोगैराक्रान्तोऽहं शत्रुभिराक्रम्यमाणो निर्बलो जन इव सर्वथा हताशोऽभवम् ।

यदाऽहं पुस्तकालयमागतस्तदा मम मनसि य उत्साह यश्चोल्लास आसीत् स सर्वोऽपि पुस्तकालयान्मयि निर्गते सत्यदृश्योऽभवत् । अहं सर्वथा रुग्णः क्लान्तः क्षीणश्चाऽस्मीति मयाऽनुभूतम्। अतः सत्वरमेवाऽहं मे चिकित्सकस्य मित्रस्य चिकित्सालयं प्राप्तः । मां दृष्ट्वा तेन पृष्टम् – 'अयि भोः ! कथं त्वमद्याऽत्राऽऽगतः ? किं गृहे कश्चन रुग्णो वा ?'

एकमपवादभूतं रोगं विहाय प्रायशः सर्वैरपि रोगैः पीडितमपि मामयमेवं पृच्छति खलु ? - इति विचिन्त्याऽहमतीव विस्मितोऽभूवम्। मया स्खलिताक्षरैस्तस्य पुस्तकालयवृत्तं श्रावयित्वा मे स्वास्थ्यपरीक्षणं कर्तुमुपचारं च कर्तुं विज्ञप्तम् । तेनाऽपि स्मित्वा सर्वविधैरपि परीक्षणैः परीक्षितोऽहम् । तत उच्चैर्विहस्य स्कन्धाभ्यां च मां धूनयित्वा स मम पृष्ठे द्वित्राश्चपेटा मारितवान् । रुग्णेन मया सह तस्यैतादृशं निर्दयं वर्तनं दृष्ट्वाऽहमाघातं प्राप्तवान्। ततो झटित्येवैकस्मिन् पत्रे स उपचारक्रमं(Prescription) लिखित्वा मे दत्तवान्। मयाऽपि तदपठित्वैव युतककोषे प्रक्षिप्तम्। तस्य चाऽऽभारं मत्वा ततोऽहं निर्गत्य त्वरयौषधापणं प्राप्तः । आपणिकायोपचारक्रमपत्रं दत्तं मया । तेनाऽपि पठित्वा मे प्रत्यर्पितं तत् । मया साश्चर्यं पृष्टं – 'भवत औषधापणे किमिदमौषधं नोपलभ्यते वा ?' तेनोक्तं – 'न ममाऽपि तु कुत्रचिदप्यौषधापणेऽत्रोल्लिखितमौषधं नैव प्राप्यते । यदि भवतो गृहमत्र स्यात् तदा भवतो माता भगिनी भ्रातृजाया वौषधमिदं सम्पाद्य दास्यति, यदि च गृहं न स्यात् तदा शीघ्रं किञ्चिच्छोभनमुपाहारगृहं गच्छतु, तत्रैवेदमौषधं प्राप्स्यते' । तस्य वचनैः सहसा चमत्कृतोऽहं तदुपचारपत्रं पठितवान् । तत्र लिखितमासीत् –

''१. प्रातः सप्तवादने चषकत्रयमितं चाय्-पानं दशाधिकसुपिष्टकैः सह ।
२. द्वादशवादने पञ्चदश रोटिकाः घृतस्निग्धाः, पर्याप्तमात्रं शाकं, द्वित्राणि कच्चोलकानि दाली, स्थाल्यर्धमित ओदनः, दुग्धं तक्रं वा चषकपूर्णम् ।
३. अपराह्णेऽपि प्रात इवोपचारः ।
४. ततः क्रोशं तदधिकं वाऽटनं पादचारेण, कन्दुकादिक्रीडनं वा ।
५. सायं च द्वि-त्रैरपूपैः सह कृशरः शाकं क्वथिता च ।
६. मासे न्यूनतोऽपि द्वि-त्रवारान् मिष्टान्नग्रहणं चतुष्पञ्चवारांश्च पक्वान्नग्रहणम् ।

**विशिष्टा सूचना**

★ यत् किमपि पठित्वा श्रुत्वा वा स्वमस्तिष्कं न विकृतं कर्तव्यम् ।''

तत आपणिकेन सहाऽहमप्युच्चैर्हसित्वा ततो निर्गतः ।

[आङ्ग्लमूलाद् गूर्जरभाषया **प्रा. नटवर-बूच**-इत्यनेन लिखितमिहाऽनूदितम् ।]

# कथात्रयी

- मुनिधर्मकीर्तिविजयः

## ( १ )
## अस्ति भगवान् ?

एको नास्तिकः संन्यासिने कथितवान् – इह जगति भगवानस्ति, इति न मन्येऽहम् । यदि भवता भगवान् साक्षाद् दर्श्येत तर्हि सोऽस्ति, इति स्वीकुर्याम् ।

भगवत्पूजायां निरतः स संन्यासी क्षणं स्मित्वा दुग्धभृतं चषकं दत्तवान् पृष्टवाँश्च – कीदृशमस्ति दुग्धम् ?

नास्तिक उवाच – मधुरम् ।

संन्यासिना पृष्टम् – कथं मधुरमस्ति ?

नास्तिक आह – शर्करामिश्रितं दुग्धमस्ति, इत्यतः ।

संन्यासी उक्तवान् – यदि भवान् दुग्धात् शर्करां पृथक् कुर्यात् तर्हि भगवानस्ति, इति स्वीक्रियते मया ।

नास्तिकः कथितवान् – कथमेतच्छक्यम् ! एतत्त्वनुभवेनैव ज्ञायते ।

संन्यासिना व्याकृतम् – अहमप्येतदेव वच्मि । भगवान् तु सर्वत्राऽस्ति । तथाऽपि स न दृश्यते, किन्त्वनुभूयते । तथाऽपि यथा प्रयोगशालायां दुग्धं शर्करा च भिन्नीकर्तुं शक्ये तथैव यदि जीवने साधना क्रियते तदा भगवतः साक्षात्कारो भवति । अतो न दृश्यते ततो नास्ति, इति कथनं नोचितम् ।

( २ )

# मित्रनिष्ठा

कस्मिँश्चिन्नगरे बिलः फ्रान्कश्चेति द्वौ प्रातिवेश्मिकौ सुहृदौ वसतः स्म । दैवादेको धनिको जातोऽन्यश्च निर्धनो जातः । ततो यज्जनेभ्यो धनं गृहीतं तत्तेभ्योऽहं कथं प्रत्यर्पयिष्यामि ? किं मे भविष्यति ? इति चिन्तया व्याकुलः स निर्धनो मृतः ।

कियच्चित्कालानन्तरं स धनिको मृतस्य तस्य प्रातिवेश्मिकस्य गृहे गतवान् । तदा मित्रपत्नी पत्युराय-व्ययपुस्तकं पश्यन्त्यासीत् ।

आगच्छन्तं पतिमित्रं दृष्ट्वा सोवाच – आगच्छतु, आगच्छतु । अत्रोपविशतु । यावदहं चाय्पेयमान-यामि तावद् भवान् भवदीयमित्रस्यैतानि वस्तूनि पश्यतु, यद् रोचते तद् गृह्णातु - इत्युक्तवती सा ।

धनिकोऽखिलवस्तूनि पश्यति स्म । तदा मित्रपत्नी चायपेयं गृहीत्वाऽऽगतवती । धनिको मित्रस्य फ्रान्कस्य आय-व्ययपुस्तकं गृहीतवानुक्तवाँश्च – भगिनि ! भवत्याः कथनस्याऽनुरूपं मह्यमेतत् पुस्तकं रोचते, तत एतद् गृह्णामि ।

एतादृशं मित्रप्रेम दृष्ट्वा तस्या नयने आर्द्रे जाते ।

( ३ )

# जीवनम्

एको विद्वान् सिद्धतपस्विनः समीपं गतवान् ।

तपस्विना पृष्टम् – किं मार्गयति भवान् ?

विद्वान् उवाच – जीवनम् ।

तपस्वी प्राह – यदि भवता जीवनं सत्यतया जीवितव्यं तर्हि शब्दा विहातव्याः ।

विद्वान् कथितवान् – न ज्ञातं मया, भवता किमुक्तम् ?

तपस्वी जगाद – भवान् शब्दजालेन रचिते विश्वे जीवति । भवता शब्दैरेव सन्तोषोऽनुभूयते, शब्देषु चैव रम्यते । भो ! जलस्य भोजनस्य च वार्तयोदरं न भ्रियते । वस्तुतो जीवनस्य कृते आचरणमावश्यकमस्ति ।

# गिटार-वाद्यस्य प्रथमो ध्वनिः

**मुनिकल्याणकीर्तिविजयः**

'यो दद्यात् तस्याऽपि शुभं भवतु, यो न दद्यात् तस्याऽपि च' - इत्युच्चैरारटन् कश्चन भिक्षुको यावद् गतवान् तावताऽन्यौ दम्पती 'भो ! अस्मान् शृणुत, स युष्माकं श्रोष्यति......' इत्यतीव कर्कशस्वरेण गायन्तौ समागतौ । ततो जलपुटकविक्रेता, वटकविक्रेता, प्रसाधनसामग्रीविक्रेत्री...... इत्येवं बहवो गतागतं कुर्वाणाः सर्वतो भृतस्य रेलयान-प्रकोष्ठस्य सम्मर्दे वृद्धिं कुर्वन्ति स्म । एकतो वैशाखमासस्याऽरुन्तदो घर्मः, तत्र च श्वासग्रहणेऽपि बाधको जनसम्मर्दः, तत्राऽपि जनानां प्रस्वेदस्य तीव्रो गन्धः - सर्वमप्येतन्मिलित्वा यद् वातावरणं समुदपादयत् तत् सर्वथाऽसह्यमासीत् । सारङ्गोऽपि तत्रैव प्रकोष्ठे आसीत् । एतावति जनसम्मर्दे सोऽद्यैव क्रीतं गिटार-वाद्यं गृहीत्वा यदा प्रकोष्ठे प्रविष्टस्तदाऽऽपातमात्रेण तस्य चिन्ता जाता यत् - कथमिदं वाद्यं जनसम्मर्दे रक्षिष्यामि ? किन्तु द्वित्रस्थानकातिक्रमणानन्तरं तस्यैकत्रोपवेष्टुमवकाशः प्राप्त एव । सोऽद्यावधि स्कन्धे लम्बमानं गिटारवाद्यं स्वोत्सङ्गे निधाय विश्रान्तिमनुभवन्नुपविष्टः ।

'इमे भिक्षुकहतकाः, यदा पश्यामस्तदा याचमाना भवन्त्येव' — तदासन्ने स्थितेनैकेन जनेन सामर्षं गदितम् । स-रसवार्तालापस्य मङ्गलं तेन सहसा कृतमिति तदनुमोदनार्थं बहवो जनास्तत्पूर्त्यर्थं लग्नाः । 'सत्यमुक्तं भवता । सश्रमं किमपि कार्यं न कृत्वा यद्येवमेव धनं प्राप्येत तदा तु वरमेव !!' — इत्येकेनोक्तम् । 'न जाने कुत्र गत्वेयतो धनस्योपयोगमेते करिष्यन्ति ?' — अन्यः सनिःश्वासं कथितवान् । 'एतावति सम्मर्देऽस्माकं पादमेकं स्थापयितुमपि स्थानं नास्ति तदैते तु साटोपं गानं गायन्तः ससुखं कथं भ्राम्यन्ति - इत्येव मे महत् कुतूहलम्' — इत्यपरः कश्चन सस्मितमवदत् । अथैतावन्तं कालं तूष्णीं स्थितोऽन्यः कश्चनाऽपि स्वज्ञानं प्रादर्शयत् — 'भोः ! सज्जनाः ! एतेषु बहवो ग्रन्थिच्छेदका अपि भवन्ति। यदि जनसम्मर्दोऽधिको भवेत् तदैतेषां कार्यं सुकरं भवेत् खलु !!'

सारङ्गो मौनेन तेषां वार्तालापं शृणोति स्म । तेन चिन्तितं – 'वृथा किमर्थं निरर्थकेऽत्र वार्तालापे मया भागो ग्रहीतव्यः ?' अतः स गिटारवाद्येन सह प्राप्तस्य स्वराङ्कनपुस्तकस्य पठने मग्नोऽभवत् । इतश्च प्रकोष्ठे याचकानां विक्रेतृणां यात्रिणां च गमनागमनमविरतं प्रचलति स्म । तावता तालान् वादयन्नपुंसकवृन्दं समागतमतः सर्वेषामप्यवधानं तत्राऽऽकृष्टम् ।

ततः प्रायो द्वादशवर्षदेशीयौ द्वौ भिक्षुबालकौ 'द्विनद्वयाद् बुभुक्षितौ स्वः, कृपया किञ्चिद् ददातु' – इत्युदित्वा याचेते स्म । तयोश्चैकस्य हस्ताघातेन चायपानं कुर्वतो यात्रिकस्य कस्यचन चायपात्रं किञ्चित्प्रकम्पितं चायपेयं च मनाग् विलुठितम् । एतेन क्रुद्धः स यात्रिकस्तं बालमाक्रोशति स्म – 'भोः ! दृश्यते न वा ? किमन्धोऽसि रे ! एतच्चायपेयं यन्मम वस्त्रोपरि विलुठितं तस्य लाञ्छनं(दाग) किं तव जनकोऽपनेष्यति वा ?'

सारङ्गेण दृष्टं यच्चायपेयस्यैकोऽपि बिन्दुस्तद्वस्त्रोपरि नैव पतितः प्रत्युत किञ्चित् पेयं प्रकोष्ठकुट्टिमे विलुठितमासीत् । तावता वातावरणं भाररहितं कर्तुमेकेन युवकेन विनोदं कुर्वता कथितं – 'पितृव्य ! कोपं मा कार्षीत् । एतत्तु एवमेव चलिष्यति । एतादृशा एव बालका अस्माकं देशस्य भविष्यत् । मे भारतं महत् (मेरा भारत महान)' । एतच्छ्रुत्वा परितः स्थिताः सर्वेऽप्युच्चैर्हसितवन्तः ।

तदैवैका पञ्च-षवर्षीया बालिका वर्षद्वयदेशीयं स्वभ्रातरं यथाकथञ्चिदपि समुत्थाप्य समागता । जर्जरितं वस्त्रं, सुगृहीनीडमिव केशान् दीनं च वदनं धारयन्त्या तया स्वभ्रातुर्निर्गण्डकं युतकमेव केवलं परिधापितमासीत् । अर्धोरुकमूरुकं वा कुतोऽपि न लब्धं स्यादतोऽधस्तात् स नग्न एवाऽऽसीत् ।

'अहो ! अद्य तु नूतनः कलाकारः समागतः' – इत्येकेन नित्यं गमनागमनं कुर्वता यात्रिणोक्तम् । सर्वेषां दृष्टिस्तयोरेव पतिता । सारङ्गोऽपि हि षण्मासेभ्योऽस्मिन्नेव याने यातायातं करोति स्म । किन्तु तेनाऽपि न कदाप्येतौ दृष्टचरौ । अथैका महिला करुणयोक्तवती – 'दिनद्वयात् पूर्वं या स्त्री रेलयानापघाते मृता तस्या एतौ बालौ । वराकौ निर्मातृकौ जातौ !!' ।

श्रुत्वैतत् सर्वेषामपि चित्तानि दयार्द्राणि जातानि । प्रायः सर्वेऽपि स्वस्वकोषेभ्यो यत्किञ्चिद्धनं निष्कास्य तस्यै बालिकायै दातुं सिद्धा जाताः । किन्तु सा बालिका तु सारङ्गसम्मुखमेव पश्यन्ती स्थिता । केनचिदाहूता सेतस्ततो गत्वाऽपि पौनःपुन्येन सारङ्गसमीपमेवाऽऽगत्य तिष्ठति स्म । सारङ्गेण स्वकोषान्मिष्टिकाद्वयं निष्कास्य दत्तम् । एतेन स लघुर्बालो हृष्टो जातः । किन्तु सा बालिका ततोऽपि तत्रैव स्थिता । तस्या नेत्रयोरितोऽपि काचिद्याचना दृश्यते स्म । तामुपलक्ष्य सारङ्गेण पृष्टं – 'किं वाञ्छसि ? रूप्यकं दद्यां वा ?'

'नैव स्वामिन् ! किन्तु,....... अद्य मे भ्रातुर्जन्मदिनमस्ति' ।

'एवं वा ? बाढम् ! तदर्थं किमपि क्रेतव्यं वा ?'

'नैव स्वामिन् !' सा गिटार-वाद्यं पश्यन्ती कथितवती – 'किन्तु...यदि भवान्.... भवान्

वाद्येनाऽनेन ''हेप्पी बर्थ डे...'' इति गीतं वादयतु कृपया ! मम भ्राताऽयं हृष्टो भविष्यति.... मातरं विना सर्वदाऽपि रोदिति स खलु !!'

एतच्छ्रुत्वा सारङ्गः सर्वाङ्गेषु प्रकम्पितः । यथाकथमपि स्वं संयम्य स उत्थितो गिटार-वाद्यं च तदावरणाद् बहिर्निष्कास्य वादयितुमारब्धः –

''हेप्पी बर्थ-डे टु यु, हेप्पी बर्थ-डे टु यु, हेप्पी बर्थ-डे डियर...'' प्रकोष्ठे स्थिताः सर्वेऽपि यात्रिणः सकरतालं तेन सह गातुं लग्नाः । बालिकावदनं प्रसन्नतापूर्णं जातम् । तया मृदुतया स्वभ्राता-ऽधोऽवतारितः । सोऽपि लघुबालः सङ्गीत-ताल-लयं श्रुत्वा हर्षातिरेकान्नर्तनमारब्धवान् ।

तावता बालिकया सारङ्गपार्श्वे समागत्य कथितं – 'स्वामिन् ! मातुर्मरणानन्तरं मे भ्राताऽयमद्यैद-म्प्राथम्येन हसन्नस्ति !!' तदाकर्ण्य कथमप्यश्रूणि नियन्त्र्य सारङ्गेण वादनं समापितम् । ततो वाद्यं पुनरपि तदावरणे स्थापयता तेन चिन्तितं यद् – 'गिटार-वाद्यमिदं तेनाऽतीव शुभे मुहूर्ते क्रीतं ननु !' । ततश्च लघुबालकस्य मस्तके हस्तं प्रसार्य तेन सस्नेहं कथितं –

'हेप्पी बर्थ-डे वत्स !'

हिन्दीमूलम् – **अखिल रायजादा**
गुर्जरानुवादः – **आशावीरेन्द्रः**
सौजन्यं – **भूमिपुत्रः**

# नौशीरवानस्य नीतिकथा

**मुनिअक्षयरत्नविजयः**
(-पूज्याचार्यदेवश्रीधर्मसूरीश्वरसमुदायवर्ती)

हस्तिने दत्तं प्रभूतमपि भोजनं प्रायेण स्वल्पं भवति । किन्तु पिपीलिकायै दत्तं स्वल्पमपि भोजनं नितरां प्रभूतं भवति । कथं नाम तद् 'पिपीलिकायै दत्तमिति' घटते ? एकस्य हस्तिन उच्छिष्टभोजनेनाऽप्य-नेकशतानां पिपीलिकानां तृप्तिर्भवेदिति पिपीलिकायै दत्तं स्वल्पमपि तासां कृते प्रभूतं भवति । भारतीय-राष्ट्रभाषायामप्यत एवोक्तं यद् 'हाथी मुखसे दाणा नीकले, कीडीकुटुम्ब सौ खावे ।'

यथेमाः पिपीलिकास्तथैव ह्यात्मार्थिनः स्वहितवाञ्छुकजनाः । यथा पिपीलिकायै दत्तं स्वल्पमपि तासां कृते प्रभूतं भवेत्तथा ह्यात्मार्थिनां स्वहितेच्छुकमानवानामपि प्राप्तं किञ्चिदपि तेषां हितस्वरूपेण प्रभूतमेव भवेत् । तत्तु किञ्चिद् केनाऽपि रूपेण स्यात्; सत्यघटनारूपेण, सदुपदेशरूपेण, कथारूपेण, सुवाक्यरूपेण वा । किन्तु तानि सर्वाण्यात्मार्थिस्वहितकाङ्क्षिमनुष्येभ्यो निश्चयात् कल्याणायैव भवन्ति । तत्र न कोऽपि विकल्पः ।

आगच्छत, वयमद्य प्रथमं तु जीवनपरिवर्तकेन सुवाक्येन, तत्पश्चात्तु सुवाक्यानुपदिन्या प्रेरणादायिन्या सुकथया स्वहितचिन्तनं कुर्याम । तेन च वयमपि स्वात्महितार्थित्वं प्राप्नुयाम ।

तत् चित्तहरत्रिपदीमयं सुवाक्यमिदं यत् – '**१. नीत्या प्राप्तव्यं २. रीत्या भोक्तव्यं ३. प्रीत्या दातव्यं**' चेति । वयमिमां त्रिपदीं पश्चानुपूर्व्या विचिन्तयामः ।

जीवनयात्रायां कदाचित् दानप्रसङ्गः समुपस्थितो भवेत् (अत्र प्रधानतया धनदानस्य प्रसङ्गो ग्रहीतव्यः) तदा सदैव सुवचनपूर्वकेन सस्मितवदनेन प्रदातव्यम् । तस्मिन् कारणद्वयमस्ति । (१) म्लानवदनेन प्रदत्तं दानं सुफलदायकं न भवति । (२) सुवचनपूर्वकेन सस्मितवदनेन प्रदत्तेन दानेन याचका हर्षयुगलं लभन्ते । कीदृशं तद् हर्षयुगलम् ? ईदृशम् – तत्र प्रथमो धनलाभस्य हर्षः, द्वितीयः

सहानुभूतेर्लाभस्य हर्षः । एताभ्यां तेषां धैर्यमपि वर्धते । अत एव त्रिपदीमयसुवाक्यस्य तृतीयपदे कथितं प्रीत्या दातव्यमिति ।

जीवनप्रवासे कदाचित् पूर्वपुण्यसंयोगेन पारावारैश्वर्यलाभोऽपि भवेत् । तदा तस्य किं कर्तव्यम् ? यदि जनः सद्विचारशीलो न स्यात्तर्हि तस्य दुरुपयोगसम्भवः । तस्य सदुपयोग एव भवेदित्याशयतः प्रस्तुतं त्रिपदीमयसुवाक्ये द्वितीयपदं रीत्या भोक्तव्यमिति ।

अतः परमाद्यपदस्यचिन्तनं – जीवनप्रवाहे यानि कानिचिदपि प्राप्तव्यानि सन्ति, तानि सर्वाणि नीत्यैव प्राप्तव्यानि, न तु अनीत्या । यदि नीत्या न लभ्येत तर्हि त्यक्तव्यं किन्त्वनीत्या तु नैव प्राप्तव्यम्। अनीतिस्तु दुर्गतिदात्र्यपि भवितुं सुतरां शक्नोति । अत एव तस्या दुष्परिणामात् स्वात्मरक्षणाय कथितं त्रिपदीमयसुवाक्ये तृतीयपदं यन्नीत्या प्राप्तव्यमिति ।

अयं तु सुवाक्यस्य बोधः । किन्तु वयमस्य सुवाक्यस्य प्रथमपदमवलम्ब्य तस्य तात्पर्यप्रकाशिकां सुन्दरां कथामेकां योजयित्वा प्रेरणापानं कुर्याम ।

★ ★ ★

'इराना'ख्यजनपदस्येयं कथा । तद्राष्ट्रे नृपतिरेको बभूव । तस्याभिख्या 'नौशीरवान' इत्यासीत्। प्रजावत्सलस्य तस्य प्रकृतिरतिन्यायप्रिया दयावती चाऽऽसीत् ।

एकस्मिन्नह्नि राजसिंहासन उपविष्टो राजा नौशीरवान एकं सुन्दरतमं प्रासादं निर्मातुं चिन्तितवान्। मनोरमराजप्रासादस्य निर्माणाय राज्यस्य श्रेष्ठाविश्वकर्माणः स समाह्वयत् ।

राज्ञ आदेशतो विश्वकर्माणः प्रासादाय सुन्दरं स्थलं गवेषयितुं लग्नाः । बहुगवेषणानन्तरं एकमभिरामं रुचिरं च स्थलं तैर्निश्चितम् । राजमन्दिरस्य निर्माणार्थमनेके शिल्पकारका मिलितवन्तः ।

किन्तु तस्मिन् स्थान एकोऽन्तराय आसीत् । तत्रैकस्या वृद्धाया उटजमासीत् । सा वृद्धा वह्नि-नाऽन्नचणकान् पक्त्वा विक्रीय च स्वजीवनमयापयत् । तस्या गेहमत्यन्तं जीर्णमासीत् । इतश्च तस्य भङ्गं विना तत्र राजप्रासादस्य निर्माणमशक्यमासीत् ।

शिल्पकारकै राजा निवेदितः – ''अये राजन् ! महासदनाय स्थानं तु लब्धमस्ति । तच्चाऽतिमनोज्ञमस्ति । किन्तु तस्मिन् स्थले कस्याश्चिद् वृद्धाया निवासोऽस्ति । तस्य भङ्गानन्तरमेव भव्यं राजमन्दिरं निर्मातुं वयं शक्ष्यामः ।''

सस्मितवदनो नौशीरवानः प्राह – ''किमेतस्मिन् ? वयं तस्या वृद्धाया वसनार्थमुटजात् प्रति सा यादृग् वाञ्छेत् तादृग्, यावच्च वाञ्छेत् तावत् स्थानं समर्पयिष्यामः । यूयं चिन्ताविहीना भवत ।''

राजा मन्त्रिणमाकारयदादिशच्च – ''गच्छ, तां वृद्धां कथय, यदुटजं त्यक्त्वाऽन्यस्मिन् स्थाने वसनाय गच्छतु, तस्मिन् स्थाने वयं भव्यराजमहालयं निर्मातुमिच्छामः ।''

मन्त्री वृद्धायाः समीपं गतवान्, तत्र च गत्वा राजसन्देशमदात्। प्रत्युत्तरेऽनुभववृद्धा सा वयोवृद्धा नवयुवतिवद् महारवेणाऽवोचत् – ''नहि, किं वदथ यूयम् ? एतादृशं तु कदाचिदपि न भविष्यति, स नृपतिस्स्यात्तर्हि किं जातम् ? राजा महालयं सुखेन बध्नातु, किन्त्वहमुटजं नैव त्यक्ष्यामि ।''

प्रधानो नम्रवचसा जल्पितवान् – ''मातः ! राज्ञ आदेशस्याऽवमूलनं न स्यात् ।''

मनागावेशेन सह वृद्धाऽगृणात् – ''अलं तादृगादेशेन। अहं त्वतः किमपि स्थानं न गमिष्यामि। एतत् स्थानं कदाऽपि न त्यक्ष्यामि ।''

प्रधानः पराभूतः प्रत्यावृत्तः । तेन राजा वृत्तान्तममुमवगमितः । ततो राजा स्वयं वृद्धायास्समीपमाजगाम। उटजमयाचत च। स मधुररवेणोवाच – ''मातः ! पुत्रस्य विज्ञप्तिं कथं न स्वीकरोषि ? उटजात् प्रति श्रेष्ठं गृहं बद्ध्वाऽहं तुभ्यं प्रदास्यामि। त्वं यावद् याचेथाः तावद् धनमपि दास्यामि। किन्तु भव्यराजप्रासादनिर्माणाय मह्यं त्वद्गृहं प्रयच्छ ।''

तथाऽपि वृद्धा मनागपि न व्यचलत्, तया पुनरपि कथितो नृपः – ''प्रस्तावमिमं विस्मर । ममैतावद्जीवनं मयाऽत्रैव व्यतीतम्, अहमत्राऽरमे, अपठम्, अनृत्यम्, बालत्वमत्र व्यतीतं, जरत्यपीहैव जाता, अथ च मरिष्येऽपीहैव । अहमिदमुटजं न दास्यामि । ममाऽन्यस्य गृहस्याऽऽकाङ्क्षाऽपि नास्ति। लक्ष्मीः संपत्तिश्चाऽपि मम कृते किञ्चित्करी नास्ति ।

युष्मभ्यं युष्माकं राजप्रासादो रोचते । ततोऽपि मह्यं ममेदं त्रुटितं भग्नमुटजमतिप्रियमस्ति । मम पूर्वजैरनेकानि दुःखानि सहित्वोटजमिदं निर्मितमस्ति। अस्योटजस्य धरण्यामस्माकं कुलकुटुम्बस्य पूर्वजानां च जीवनस्य सुखदुःखयोरनेकानि संस्मरणानि निहितानि सन्ति । सततं तेषां ध्वनयोऽत्राऽऽगच्छन्ति ।

अन्नं प्राप्येतोताहो न प्राप्येत। नास्ति तस्य चिन्ता। किन्तु मम बहुमूल्यानां संस्मरणानामहर्निशं स्मारकमिदमुटजं त्वहं कयाऽपि रीत्या दातुं शक्तिमती नास्मि। त्यक्तुं शक्तिमती नास्मि।...'' एवं वदत्या तस्या उभे नेत्रे बाष्पैः प्लावितवती ।

वृद्धाया इमां हृदयव्यथां श्रुत्वा नृपो नौशीरवानः स्वीयेच्छां त्यक्तवान्। नौशीरवानस्तस्मै मुहुर्मुहुराश्वास्य किञ्चित् साहाय्यमपि दत्वा स्वप्रासादं प्रत्यावृत्तः ।

यदि सोऽकाङ्क्षिष्यत् तर्हि स्वसामर्थ्याद् वृद्धाया निवासमग्रहीष्यत्। किन्तु तदकार्यं स दयावान् नीतिमान् नृपतिर्नाऽकरोत् । स वृद्धाया उटजवन्तं भागं त्यक्त्वा प्रासादस्य निर्माणार्थमादेशमकरोत् । कियच्चित्समयानन्तरं प्रासादनिर्माणं पूर्णं जातम्। किन्तु वृद्धाया उटजस्य रक्षणाय कोण एकस्त्यक्तः । फलतो राजप्रासादस्त्रिकोणाकारवान् सञ्जातः । तस्य च निरवशेषा शोभा भग्ना ।

कालः सरिद्वद् वहति स्म । एकदाऽऽपदपराऽऽगता ।

साऽऽपत्तिरियं यद् वृद्धा त्वाजीविकार्थं स्वनियमानुसारेणोटजस्य बहिर्भूमौ चणकान् प्रतिदिनं भृज्जति स्म ।

भ्राष्ट्राग्नेरग्निवाहः (धूमः) प्रासादं प्रत्यगच्छत्, प्रासादस्य च मनोहरा भित्तयस्तेन कृष्णीभवन्ति स्म ।

तत एकस्मिन् दिने राज्यस्य प्रधानो वृद्धां प्रार्थितवान् – ''भो मातः ! इतस्त्वया भ्राष्ट्रमिदं न प्रज्वालनीयम् । अग्नेर्धूमेन राजप्रासादस्य मूल्यवत्यो भित्तयः खलीभवन्ति । अस्माकं राजा सज्जनोऽस्त्यतस्त्वामग्निं ज्वालयितुं न निषिध्यति । अन्यः कोऽपि राजाऽभविष्यत्, तर्हि कियच्चित्समयात् पूर्वमेव त्वामितः प्राहेष्यत् ।''

वृद्धया भाषितं – ''एवं वार्ताऽस्ति ? तर्हि मम वार्तामपि शृणुत । वह्निर्न शमिष्यति । तदायत्तं तु मम जीवनमस्ति । यद्यसौ शाम्येत् तर्ह्यहं किं खादिष्यामि ? केनाऽहं जीविष्यामि ?''

प्रधानो जल्पितवान् – ''तदर्थं चिन्ता न कार्या । यदा युष्माभिरग्निर्विरंस्यते तदा युष्मभ्यं भोजनं वस्त्राणि धनानि च राज्यं दास्यति ।''

वृद्धाऽवदत् – ''न रे, भ्रातर्न ! अहमीदृशं साहाय्यं न काङ्क्षामि । अहं भिक्षुका नाऽस्मि । मम हस्तपादाश्चलन्ति, न त्वहं विकलाङ्गा, तर्ह्यहं किमर्थं परावलम्बिनी स्याम् ?''

प्रधानेन वृद्धायै पुनर्विज्ञप्तिः कृता । किन्तु साऽचलाऽऽसीत् ।

कथेयं नृपस्य कर्णयोरागता । तदा क्रोधस्य स्थाने वैपरीत्येन स वृद्धायास्स्वाभिमानं दृष्ट्वाऽमोदत । वृद्धा मरणपर्यन्तं भ्राष्ट्रं ज्वालयन्त्येवाऽऽसीत् । राजमन्दिरस्य च शोभना भित्तयो वृद्धाया धूमेन दूष्यमाना आसन् । तथाऽपि न्यायप्रियो मानवेशो नौशीरवानो वृद्धाया भ्राष्ट्रं नोन्मूलितवान् । वृद्धां च न निष्कासितवान् । एवं तस्या उटजमपि न विनाशितवान् ।

एतादृगद्भुतन्यायप्रियतया राजा नौशीरवानो जगति परां प्रसिद्धिं प्राप्तवान् ।

[विशेषः – इतिहासकारकैर्न्यायप्रियताया ईदृश्योऽन्या अनेका घटना अपि लिखितास्सन्ति । गुर्जरराजमातृ-मीनलदेवीसम्बन्धिनी मलावतडागकथा तथा विकर्णिकस्य (कश्मीरस्य) नृपतेश्चन्द्रापीडस्य प्रासादस्य निर्माणार्थमपीदृश्येव कथा श्रूयते ।]

कथामेतां श्रुत्वाऽस्माभिः किं कर्तव्यम् ? अस्माभिरेको जीवनपरिवर्तकः सङ्कल्पः कार्यः । अयमेव स सङ्कल्पो यदस्माभिरपि नीत्यैव प्राप्तव्यं, रीत्यैव भोक्तव्यं, प्रीत्या चैव दातव्यम् । एभिश्च स्वात्मा दुर्गते रक्षितव्यः ।

यदि वयमस्मज्जीवने नीतिं च रीतिं च प्रीतिं चाऽऽविष्करिष्यामस्तर्हि निश्चयात् वयमप्याऽऽत्मार्थिस्वहितवाञ्छुकजनपङ्क्त्यामस्माकं स्थानं ग्रहीष्यामः ।

किं वयं स्वात्महिताय करिष्याम एतावत् ?

कथा

# अभयदेवी

## एच्. वि. नागराजराव्

पश्चिमसमुद्रतीरे विराजते उल्लाळराज्यम् । समुद्रराजस्य रवस्तत्र सदा श्रूयते । उर्वरा भूः प्रजानां सर्वान् कामान् पूरयति ।

राजा प्रत्यक्षदेवता इति उल्लाळराज्यस्य प्रजाः प्रविश्वसन्ति स्म । प्रजानां हितमेव स साधयिष्यतीति प्रजानां दृढा श्रद्धा । किन्तु राजा सुखलोलुपोऽभवत् । सदा स मद्यं पीत्वा गाननृत्यदर्शनेन कालं नयति स्म । प्रजानां कष्टानि परिहर्तुं चिन्तामपि नाऽकरोत् । उल्लाळराज्ये मरिचलवङ्गैलादीनामुत्पत्तिरधिका । तां क्रेतुं विदेशेभ्योऽपि वणिज आगच्छन्ति स्म । राज्यस्य कोशे सम्पद्राशिरभवत् । किन्तु सम्प्रति राजा तस्याः सम्पदोऽपव्ययमकरोत् । वणिजां रक्षायामपि स औदासीन्यमभजत ।

एतस्मिन् सन्दर्भे पोर्तुगीसाः पवित्रायां भारतभूमौ पदं न्यधुः । वाणिज्यार्थमागताः पश्चिमतीरस्य कांश्चन प्रदेशान् वशीकृत्य स्वशासनं प्रावर्तयन् । उल्लाळराज्यस्य राजा विषयासक्तः । तं वशयितुं तद्राज्यं कवलयितुं चाऽवकाशोऽस्तीति पोर्तुगीसा अजानन् । शीघ्रं तत्र प्रवृत्ताश्च ।

उल्लाळराज्यस्य मन्त्रिणश्चिन्ताक्रान्ता अभवन् । यदि कश्चिदन्यो देशक्षेमविरुद्धं कार्यमकरिष्यत्, तर्हि तं ते दण्डयितुं शक्ता अभविष्यन् । किन्तु राजा एव यदा द्रोहं कर्तुं व्यवस्यति, तदा मन्त्रिणः किं कर्तुं शक्नुवन्ति ? तथाऽपि प्रधानमन्त्री अन्यैर्मन्त्रिभिः साकं समालोच्य राज्ञीमभयदेवीमेव प्रार्थयितुं निश्चयमकरोत् । तस्यै समस्तां वार्तां निवेद्य ''राज्ञि, भवती एव राज्यं रक्षेत् । अमार्गात् तव भर्तारं राजानं मार्गे प्रवर्तयेत्'' इति प्रार्थयत । ''प्रयतिष्ये'' इति राज्ञी अवदत् ।

प्रीत्या, अनुनयेन, उदाहरणवर्णनेन, अर्थशास्त्ररहस्योपदेशेन च राजानं सन्मार्गे आनेतुं राज्ञ्या अभयदेव्या सर्वे प्रयत्नाः कृताः । राजा सर्वमशृणोत् । किन्तु मद्यपानदासस्य तस्य दौर्बल्यं न गतम् ।

पोर्तुगीसानां प्रतिनिधिस्तु राज्ञे स्वदेशादानीतं मद्यं दत्तवान् । तत्पानानन्तरं राजा क्षणे क्षणे तत्पातुमैच्छत् । राज्यं, प्रजाः, धर्मपत्नी, पुत्री इति सर्वं तेन विस्मृतम् । मद्यं लब्धुकामः स्वाभिमानमत्यजत् । तस्माल्लज्जा दूरीभूता । अहर्निशं मद्यपानमत्त एव कालमनयत् । राज्ञो दौर्बल्यं पोर्तुगीसप्रतिनिधिरवर्धयत् । मद्यं विना क्षणमेकमपि स्थातुं राजा नाऽशक्नोत् ।

''रजतं दास्यामि, सुवर्णं दास्यामि, तवाऽभिमतं सर्वं दास्यामि । मद्यं पुनस्तदेव मद्यं देहि'' इति राजा पोर्तुगीसप्रतिनिधिमयाचत ।

''राजन्, भवान् स्वराज्यं त्यक्त्वाऽस्माकं केन्द्रप्रदेशमागच्छतु । तत्र यथेच्छमिदं मद्यं पिबतु। अस्मद्देशादागताः श्वेतसुन्दर्यः सन्ति । ताभिः सह भवान् क्रीडतु । यौवनस्य पूर्णं सुखमनुभवतु'' इति प्रतिनिधिः प्रालोभयद् राजानम् । राजा तथाऽस्तु इति प्रभूतेन स्वर्णराशिना सह पोर्तुगीसानां केन्द्रप्रदेश-मगच्छत् । गोमान्तकाख्ये स्थले न्यवसत् ।

एतत् सर्वं मन्त्रिभिरभयदेव्यै निवेदितम् । राज्ञी अशोचत्, पत्येऽकुप्यत्, अरोदीच्च । अन्ते सा मोहान्धकाराद् बहिरागता मनो दृढीकृत्याऽब्रवीत् ''बन्धुरपि पुत्रोऽपि पतिरपि देशद्रोही त्याज्य एव । अहं तं द्रोहिणं त्यजामि । अद्यैव, अस्मिन् क्षण एव उल्लाळराज्यस्य सार्वभौमत्वं सर्वाधिकारं चाऽहमेव वहामि। राज्ये घोषणा क्रियताम् । अभयदेवी न्यायेन प्रजाः शासिष्यति । धर्मेण सर्वान् पालयिष्यति । तस्या एवाऽऽज्ञा सर्वैरनुसरणीया । राज्ञ्या आज्ञां यो धिक्करोति, तस्य तीव्रा दण्डना भविष्यतीति'' ।

अभयदेव्या वचनं सर्वैर्मन्त्रिभिः सेनानीभिश्चाऽभिनन्दितम् । तथैव घोषणा सर्वत्र राज्ये कृता । प्रजाः सन्तुष्टाः । सर्वेषु जनेषु नूतन उत्साह आगतः, उल्लास उद्भूतः ।

पोर्तुगीसकेन्द्रे वैदेशिका राजानं मद्यं पाययित्वा ''उल्लाळराज्यशासनमस्मभ्यं समर्प्यताम् । भवान् सुखसागरे मज्जतु । इन्द्र इवाऽप्सरसां नृत्यं पश्यतु'' इत्यब्रुवन् । तथाऽस्तु इति राज्ञोक्तम् । तेन तथैव पत्रं लेखयित्वा उल्लाळराज्यं वशीकर्तुं पोर्तुगीसप्रतिनिधिरागतः । किन्तु तेन दृष्टं यद् राज्ञी सिंहासनारोहणं कृतवती, तस्याः शासनं तत्र प्रवर्तत इति । आस्थानमण्डपे विराजमानायै अभयदेव्यै पत्रं दत्त्वा सोऽब्रवीत् ''उल्लाळराज्यस्य राज्ञा देशोऽस्मभ्यं समर्पितः । शासनाधिकारो मह्यं दीयताम् । राज्ञी राजसौधे वसतु। सकलं च वैभवमनुभवतु । तत्र मम विरोधो नास्ति । किन्तु अहं राज्यं शास्मि । अस्य देशस्य व्यवहारा मदिच्छानुसारेण प्रवर्तिष्यन्ते'' इति ।

राज्ञी पत्रं खण्डशश्छित्त्वा प्रतिनिधेर्मुखेऽक्षिपत् । कोपेनोच्चैस्सा जगदेव कम्पयन्ती अवोचत् ''स पूर्वो राजा देशद्रोहीति घोषितः । तस्य वचनं निरर्थकम् । तस्य पत्रं तृणायाऽपि न मन्यते । यदि गृह्यते सोऽपराधीव दण्ड्यते । सम्प्रति मम शासनमत्र प्रवर्तते । त्वां सजीवं मुञ्चामि । गत्वा तत्र ब्रूहि। यदि स द्रोही वा कोऽपि पोर्तुगीसो वा उल्लाळभूमौ पदं निधास्यति, तर्हि मृत्युदण्डो दास्यते । द्रोहिभ्यो देशेऽस्मिन् क्षमा न दीयते । गच्छेदानीम्'' इति ।

कोपेन राज्ञ्याः अभयदेव्या मुखं लोहितं जातम् । ''प्रतिनिधिपाशमेनं बद्ध्वा अस्मद्राज्याद् बहिः क्षिपत'' इति योधान् साऽऽदिशत् । तैस्तथैव कृतम् । स महता प्रयासेन स्वप्रदेशमगच्छत् ।

तत्क्षण एवाऽभयदेवी युद्धसिद्धतामारभत । सर्वाण्यायुधानि सज्जीकृतानि । सर्वे योधाः प्रशिक्षणमारभन्त । न केवलं पुरुषा अपि तु स्त्रियोऽप्यायुधानां खड्गादीनां प्रयोगे शिक्षणमलभन्त। राज्यस्य सीमासु प्रहरिणां चलनं प्रवर्तितम् । परीक्षां विना न कोऽपि उल्लाळराज्यं प्रवेष्टुं शक्तोऽभवत् ।

राज्ञी अभयदेवी अन्येभ्यो राज्येभ्यो दूतान् प्रेष्य नरपतीनब्रवीत् । ''विदेशाद् वाणिज्यव्याजेनाऽत्राऽऽगताः क्रमेण विविधैस्तन्त्रैर्देशं वशीकर्तुं प्रयतन्ते । इदानीमुल्लाळं वशीकर्तुं ते ससैन्या आगच्छन्ति । श्वः परश्वो वा भवतां राज्येष्वपि एषा स्थितिः प्रादुर्भविष्यति । अतो भवद्भिः सम्प्रति उल्लाळराज्यस्य साहाय्यं कर्तव्यम् । शत्रुरङ्कुरदशायामेव निर्मूलनीयः । स यदि प्ररोहिष्यति, तर्हि नाऽस्माकं मध्ये कोऽपि तमुच्छेत्तुं शक्ष्यति । प्रतीकार इदानीमेव कर्तव्यः'' इति । एवं सा प्रजास्वपि देशभक्तिमुदबोधयत् । देशे सर्वत्र कीर्तनकाराः परकीयाक्रमणस्य दोषानवर्णयन् । व्यायामशालासु वीराणां गाथाः श्राविताः । आबालगोपालं सर्वे शत्रून् विरुध्य योद्धुं सिद्धा अभवन् । राज्ञां प्रतिक्रिया समाना नाऽऽसीत् । केचन पोर्तुगीसेभ्यो बिभ्यति स्म । अन्ये तु उल्लाळराज्यस्य प्राबल्यं नाऽकामयन्त । परविनाशं दृष्ट्वा सन्तुष्यन्तो नीचा अपि केचिदासन् ।

केचन राष्ट्रभक्त्या जागृताः सेनासाहाय्यं प्रायच्छन् । केचन तटस्थाः स्थित्वा स्वस्वराज्येषु रक्षोपायानन्वतिष्ठन् । मासद्वयानन्तरं पोर्तुगीसा नौकाभिः समुद्रमार्गेणाऽऽगत्य उल्लाळराज्यस्योपरि आक्रमणमकुर्वन् । उल्लाळसेना सिद्धाऽऽसीत् । शत्रूणां नौकाः समुद्रे मज्जिताः शत्रुसैनिकाः केचन हताः । बहवो बद्धाः । उल्लाळसैनिकाश्च केचन हुतात्मानोऽभवन् । शत्रूणां तन्त्रं विफलमभवत् ।

पुनस्त्रिमासावधेरूर्ध्वं पोर्तुगीसाः सह बलवत्तरया सेनयाऽऽगताः । उल्लाळराजमेव पुरतः स्थापयित्वा पोर्तुगीसा आक्रमणमकुर्वन् । स देशद्रोही ''शरणागता भवत । एते श्वेता अस्मानुद्धर्तुमागताः । तेषां धर्मो महान् । तेषां विद्या महती । अतस्तदनुसरणमेवाऽस्माकं क्षेमङ्करम्'' इति योधानब्रवीत् । स्वयमश्वारूढा खड्गधारिणी दुर्गेव विजृम्भमाणा अभयदेवी स्वयोधानुत्तेजयन्ती अब्रवीत् ''स्वातन्त्र्यं स्वर्गः । पारतन्त्र्यं नरकः । स्वधर्मे निधनं श्रेयः । क्षत्रियवद् देशप्रेम्णा युध्यध्वम् । भारतभूमिं पादाक्रान्तां कर्तुमागतान् शत्रून् निर्दयं मारयत । देशद्रोहिणं परलोकं प्रेषयत'' इति ।

उल्लाळराज्यस्य शूराणां वीराणां खड्गाघातं सोढुमशक्ता शत्रुसेना नाशमुपगता । द्रोही राजा पृष्ठं दर्शयित्वा पलायनं कुर्वाणः सायकेनाऽऽहतो भूमौ पतितः । पोर्तुगीसास्तं विहाय पलायन्त ।

राज्ञी अभयदेवी साश्रुनयना तं दृष्ट्वा कृपयाऽऽविष्टा तस्य प्राणान् रक्षितुं प्रायतत । वैद्या औषधानि प्रायुञ्जत । किन्तु चिकित्सा सफला नाऽभवत् ।

''मम महापापस्य फलं मयाऽनुभूतम्'' इत्युक्त्वा राजा प्राणानत्यजत् । तस्य संस्कारः कृतः । देशरक्षिणीं राज्ञीं सर्वेऽभ्यनन्दन् ।

''राज्ञी जयतु, अभयदेवी जयतु'' इति योधा घोषयन्ति स्म । शोकाकुलाऽपि सा कर्तव्यं निर्वहन्ती शत्रून् देशाद् बहिर्धावयित्वा पत्युः परलोकसंस्कारान् कारयित्वा प्रजा धर्मेण पर्यपालयत् । स्वातन्त्र्यवीरा अभयदेवी सर्वेषामस्माकं स्फूर्तिदायिनी भवतु ।

90 9th Cross, Naviluraste Kuvempunagar,
MYSORE 570023



# विचारणम्

सम्भाषणसन्देशस्य २०११तमवर्षस्य डिसेम्बर्-मासीयायां सञ्चिकायां प्रकाशितस्य

## अद्य धारा निराधारा... निरालम्बा सरस्वती....

इति लेखस्य प्रमुखोंऽशः

– उदयनः

'अद्य धारा निराधारा निरालम्बा सरस्वती' इति इयं पङ्क्तिः प्रायः संस्कृतवाङ्मयस्य अध्येतॄणां सर्वेषामपि नितरां परिचितपूर्वा स्यादेव। यद्यपि बल्लालकृतेः भोजप्रबन्धस्य इयं पङ्क्तिः तत्कालीना (भोजराजस्य अयं चरमश्लोकः कालिदासेन इत्थं गीतः इति उल्लेखपूर्वकं तस्मिन् ग्रन्थे उपलभ्यमाना) तथापि कालेऽस्मिन् नितराम् अन्वर्थतां भजते। यस्मिन् भारतवर्षे विद्यारम्भकाले – 'सरस्वति नमस्तुभ्यं वरदे कामरूपिणि। विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा॥' इति अधुनातनकालेऽपि गीयते तस्यैव भारतवर्षस्य मध्यभागे स्थितस्य, विद्याधिदेवतायाः सरस्वत्याः मन्दिरस्य करुणापूर्णा गाथा इयम्!

प्रबन्धचिन्तामणिः इति जैनकृतिः वदति – 'परमारवंशीयः राजा भोजः देव्याः सरस्वत्याः उपासनार्थम् १०३४ तमे क्रिस्ताब्दे अधुनातने मध्यप्रदेशराज्ये विद्यमाने धारानगरे (धार इति एतत्कालीनं नाम) भोजशालां निर्मापितवान्' इति। भारतीयाध्यात्मिकतायाः संस्कृतभाषायाश्च अध्ययनकेन्द्रत्वेन प्रथिता इयं भोजशाला सवसतिकः विश्वविद्यालयः एव आसीत्। चतुर्दशशताधिकाः कवयः विद्वांसः तत्त्वज्ञाश्च इमां भोजशालाम् आश्रितवन्तः आसन् इति श्रूयते।

किन्तु किं जातं ततः? द्वादशे शतके चालुक्यवंशीयाः सोलङ्किवंशीयाश्च राजानः धारानगरं वशीकृत्य तं सरस्वतीविग्रहम् अपहृत्य गुजरातराज्यं प्रति नीत्वा १२७१ तमे वर्षे कञ्चन देवालयं निर्माय तत्र प्रतिष्ठापितवन्तः। एतावता न कापि महती हानिः जाता। ततः यवनानाम् आक्रमणम् आरब्धम्। यवनाः तत्रत्यं ग्रन्थभाण्डारं समग्रमपि नाशितवन्तः। देहलीराजानां वशं गता अभवत् भोजशाला। तादृशेषु नाशयितृषु प्रमुखः आसीत् अल्लावुद्दीनखिल्जी। (शासनकालः – १३०५ तमः क्रिस्ताब्दः) ततः पश्चात् तत्र किञ्चन यवनानां प्रार्थनामन्दिरं निर्मितम् अभवत्। अद्यापि अयं प्रदेशः यवनप्रार्थनामन्दिरत्वेनैव सर्वत्र निर्दिश्यते।

एवम् अतिमहत्त्वं वहन् अयं सरस्वतीविग्रहः अधुना कुत्र वर्तते इति पृष्टे अति उत्तरं तु – ब्रिटिश् म्यूसियम् इत्यत्र इति !! अस्माकं दीर्घकालीनं दास्यं स्मारयन् अयं विग्रहः वर्तते लण्डन्नगरे !!!

अन्ताराष्ट्रियस्तरे ख्यातः इतिहासतज्ज्ञः भूगर्भशास्त्रज्ञश्च डा० विष्णुश्रीधरवाकणकरवर्यः १९६१ तमे वर्षे लण्डन्नगरं गत्वा तत्रत्यस्य सरस्वतीविग्रहस्य विषये अध्ययनं कृतवान्। तस्य विग्रहस्य प्रत्यानयनाय तेन प्रयत्नः अपि विहितः। एतत्सम्बद्धतया सः प्रधानमन्त्रिणं नेहरूवर्यं, १९७७ तमे वर्षे इन्दिरागान्धिवर्यां च सन्दृष्टवान्। किन्तु तेन न किमपि फलं सिद्धम्।

एषु दिनेषु तन्नाम सप्टम्बर्मासस्य २५ तमे दिनाङ्के जनतापक्षस्य अध्यक्षः सुब्रह्मण्यस्वामिवर्यः भोजशालां प्रति सन्दर्शनाय गतः आसीत्। स्वयं सर्वमपि प्रत्यक्षं दृष्ट्वा तेन लण्डन्नगरस्य न्यायालये अस्य सरस्वतीविग्रहस्य प्रत्यानयनाय अभियोगः कृतः वर्तते। किं ब्रिटिश्सर्वकारः एनं विग्रहं प्रतिदद्यात्? तत्रत्याः भक्ताः तु सरस्वत्याः मूलविग्रहस्य प्रत्यागमनमेव प्रतीक्षमाणाः पूजादिकं निर्वर्तयन्तः वर्तन्ते। प्रतिशुक्रवासरं यवनाः तत्र प्रार्थनां कुर्वन्ति। प्रतिमङ्गलवासरं हिन्दवः पूजां कुर्वन्ति। अवशिष्टेषु दिनेषु कस्यापि प्रवेशः नास्ति तत्र। यदि सुब्रह्मण्यस्वामिवर्यस्य अभियोगः फलप्रदः स्यात्, तर्हि विदेशे विद्यमानाः सर्वेऽपि भारतमूलाः विग्रहाः अवश्यं प्रत्यागच्छेयुः। मुख्यमन्त्रिणि शिवराजे शासति – 'अद्य धारा सदाधारा सदालम्बा सरस्वती' इति कालिदासस्य श्लोकपङ्क्तिः किम् अन्वर्थतां प्राप्नुयात् इत्यस्य तु कालः एव उत्तरं दातुं प्रभवेत्।

**सम्भाषणसन्देश**स्य डिसेम्बर्-मासस्य सञ्चिकायाम् उदयनमहोदयेन लिखितम्-

## "अद्य धारा निराधारा निरालम्बा सरस्वती...."

इति लेखमधिकृत्य किञ्चित् –

लेखस्य तृतीये वाक्यपरिच्छेदे(paragraph) लेखकेन लिखितमस्ति यद् – "द्वादशे शतके चालुक्यवंशीयाः (त एव सोलङ्किवंशीयाः कथ्यन्ते) राजानो धारानगरं वशीकृत्य तं सरस्वतीविग्रहमपहृत्य गुजरातराज्यं प्रति नीत्वा १२७१ तमे वर्षे कञ्चन देवालयं निर्माय तत्र प्रतिष्ठापितवन्तः" इति ।

अत्र हि लेखकेन इतिहासात् किञ्चिदन्यथा सम्भावितमस्ति । गूर्जरदेशीयाः चालुक्या राजानो (मुख्यतया सिद्धराजजयसिंहः) यद्यपि धारानगरं समाक्रम्य वशीकृतवन्तो भोजशालास्थितं सरस्वतीमन्दिरं (नाम ग्रन्थभाण्डागारं, न तु सरस्वतीदेव्या देवालयं कञ्चन) चाऽपि स्वायत्तीकृत्य तत्रस्थितं विविधशास्त्र-साहित्यग्रन्थनिचयं गूर्जरदेशं प्रति समानीतवन्तः । किन्तु सरस्वतीविग्रहं तु नैव कञ्चन समानीतवन्तः (यत ईदृश उल्लेखो न कुत्राऽपीतिहासग्रन्थेषु प्राप्यते ।)

किञ्च, योऽयं सरस्वतीविग्रहो लण्डन्नगरे ब्रिटिशम्यूझियम-(सङ्ग्रहालयः)इत्यत्र वर्तते, यस्य च छायाचित्रं लेखे प्रदत्तमस्ति स विग्रहोऽस्ति मर्मरपाषाण(Marble)निर्मितः । शिल्पकलामर्मज्ञानामितिहासविदां च मतानुसारं मर्मरपाषाणनिर्मितानि शिल्पानि किल विक्रमस्य दशमशतकस्याऽनन्तरमेव घटितानि सन्ति, न ततोऽपि प्राक् । तान्यपि च शिल्पानि प्रारम्भे वर्षशतकालं यावत् प्रायो राजस्थान-गूर्जरदेशेष्वेव विरचितानि, तदनन्तरमेवाऽन्यत्र मर्मरपाषाणप्रसिद्धिर्जाता ततश्च शिल्पघटनमारब्धम् । अनेन कारणेनैष विग्रहो भोजशालासत्को नैव सम्भवति ।

अपरं च, अयं छायाचित्रस्थः* सरस्वतीविग्रहो हि मूलतयैव कस्यचन जैनदेवालयस्याऽङ्गभूतो विग्रहोऽस्ति । सध्यानं यदि विलोक्येत तदाऽस्मिन् शिल्पे विराजमानाः पञ्च जैनतीर्थकराणां प्रतिमाः सन्तीति साक्षाज्ज्ञायते । ततश्च निश्चप्रचमेषाऽस्ति जैनसरस्वतीप्रतिमा । अनेनाऽपि कारणेनाऽयं सरस्वतीविग्रहो भोजशालासत्को नैव सम्भवति, भोजराजस्य परमशैवत्वात् । स हि न कदाचिदपि जैनप्रतिमायुतं सरस्वतीविग्रहं कारयेत् समर्चयेद् वा । अतोऽयं विग्रहोऽवश्यं राजस्थानस्थितस्य कस्यचन जैनमन्दिरस्यैवाऽङ्गभूतोऽस्ति । तस्य शिल्पशैल्यपि प्रायो वैक्रमीयद्वादशशतकस्य राजस्थानस्य शिल्पकलामनुसरति इति प्रतिभाति ।

अथ च यवनानामाक्रमणकाले भञ्जित एष विग्रह प्रायः शताधिकवर्षेभ्यः पूर्वं केनचित् विदेशीय-पर्यटकेनाऽपहृत्य कथमपि स्वदेशं नीतस्ततश्च क्रमशो ब्रिटिश-सङ्ग्रहालयं प्राप्तः स्यात् ।

अतोऽस्मद्देशीय एवाऽयं सरस्वतीविग्रहो वर्तते । तस्य च प्रतिप्रापणार्थं सर्वात्मना प्रयतितव्यमेवाऽस्माभिः । केवलमैतिहासिकदृष्ट्या भोजराजनिर्मापितभोजशालासत्को नास्त्ययं विग्रह इति मनस्यवधारयितव्यम् ।

**मुनिकल्याणकीर्तिविजयः**

---

* दृश्यतां मुखपृष्ठम् ।

# मर्म–नर्म

**कीर्तित्रयी**

एको यात्रिकः पथि सञ्चरन् कञ्चन वृद्धजनं पृष्टवान् –

'भो ! इतो ग्रामः कियद् दूरं विद्यते ?'

किन्तु वृद्धः स तं नैव प्रत्युत्तरितवान् नाऽपि दृशाऽपि सम्भावितवान् । अतो यात्रिकः स्वमार्गेऽग्रेसरोऽभवत् । स यावद् विंशतिं वा पदान्यगच्छत् तावता वृद्ध उच्चैस्तमाह्वयत् – 'शृणु भोः ! आगच्छाऽत्र' ।

साश्चर्यं स प्रत्यागत्य वृद्धं पृष्टवान् – 'किमस्ति भोः! ?'

**वृद्धः** 'इतो ग्रामं गन्तुं घटिकामितः काल आवश्यकः' ।

**यात्रिकः** 'किन्तु, यदा मया पृष्टं तदा भवता किमिति नोत्तरितम् ?'

**वृद्धः** यतः, अहं नैव जानामि स्म यत् कियता वेगेन भवान् चलितुं शक्तोऽस्ति !' इति ।

◈

महाविद्यालये विद्यार्थिनः पाठयन् प्राध्यापको निबन्धमेकं पठित्वा पृष्टवान् – 'कथयन्तु मित्राणि ! निबन्धमेनमधिकृत्य भवतां मन्तव्यानि' ।

**विद्यार्थिनः** 'अतीवाऽसुन्दरोऽयं निबन्धः । केन धीमुण्डनेन लिखितोऽयम् ?'

**प्राध्यापकः** 'मयैव लिखितोऽयं भोः ! । किन्तुं घण्टाद्वयस्य शिरोर्त्तिजनकपरिश्रमस्याऽनन्तरम् !'।

(सर्वेऽपि सहासं तमुपहसितुमारब्धाः ।)

**प्राध्यापकः** भवतामुपहासोऽयमुचित एव । मया गतरात्रौ एनं लिखता सर्वथा न विस्मृतं यथा पूर्णतयाऽशोभनोऽयं लेखो भवेत् । अतो विश्वसिमि यत् तादृशलेखने सफलोऽहं जात इति । . . . . . . किन्तु, . . . . . ममैतदेवाऽऽश्चर्यं यद् भवन्तः सर्वेऽपि कथमिव प्रत्यहमीदृशमेव निबन्धं केवलं मुहूर्तार्धेनैव लिखितुं शक्ताः इति !!'

◈

सुधीरोऽश्वचालनं कुर्वन्नेकदा कञ्चिदवरोधं प्राप्याऽश्वपृष्ठादधः पतितः पादस्याऽस्थि च तस्य भग्नम्। अश्वेनैतद् विलोक्य वस्त्रद्वारा स्वमुखेन स उत्थाप्य पुनरपि स्वपृष्ठोपरि स्थापितो, गृहं प्रापितस्तदर्थं च चिकित्सकोऽपि समाहूतः ।

'अतीव चतुरोऽयमश्वो भोः !' तन्मित्राणि प्रशंसितवन्तः ।

'न तथा चतुरः । मूर्खोऽयं पशुचिकित्सकमाहूयाऽऽयातः !!' सुधीरः कोपेनोक्तवान् ।

◈

दीर्घप्रवासं गन्तुमुत्सुकः कश्चन प्रवासी कदाचित् स्वनगरे स्थितं चीनदेशीयं वणिजमेकं पृष्टवान् — 'किं चीनदेशे उत्तमाश्चिकित्सकाः सन्ति न वा ?'

**वणिक्** 'आम्! सुतरां सन्ति श्रेष्ठाश्चिकित्सकाश्चीनदेशे। तेषामपि हेन्‌-चेन्‌-चिकित्सकस्तु सर्वोत्तमः ।

**प्रवासी** 'कथमिव !!'

**वणिक्** 'एकदाऽहं रुग्णोऽभवम् । ततो मया हेन्‌-किन्नाम्न-श्चिकित्सकस्य सकाशात् रोगशान्त्यर्थमौषधं गृहीतम् । किन्तु, तेनाऽहमधिकतरं रुग्णो जातः । ततो मयाऽन्यस्मात् सेन्‌-सिन्‌ नामकाच्चिकित्सकादौषधं गृहीतम् । तदपि मां ततोऽप्यधिकतया रुग्णीकृतवत्। मया चिन्तितं 'मेऽन्तसमयः समागत' इति। अतो मया सर्वोत्तमश्चिकित्सको हेन्‌-चेन्‌ इति मम गृह एव समाहूतो मत्परीक्षणार्थम्। किन्तु, स कुत्रचिदन्यत्र चिकित्सार्थं गतवानासीदत आगन्तुं नैव शक्तोऽभवत् । ततश्च- - - - मम प्राणा रक्षिता अभवन् !!'

◈

(आपणे क्रयणार्थं गतः कश्चन जनो गणनं कुर्वन्तमापणिकं पादेन प्रहृतवान्)

ततः —

**जनः** क्षम्यतां भोः ! ममैतद् व्यसनं मानसिकास्वस्थताकारणादस्ति ।

**आपणिकः** यदि भवतः स्थानेऽहं स्यां तदाऽवश्यं मानसचिकित्सकादुपचारं कारयेयम् ।

(मासानन्तरं स जनः पुनरपि तत्रैवाऽऽपणे समागतः । तदानीं च न किञ्चिदपि जातम् ।) अतः —

**आपणिकः** मन्ये भवान् स्वस्थीभूतोऽस्ति। किं भवता मानसचिकित्सकस्य सम्पर्कः कृतो वा ?

**जनः** अवश्यं कृतः ।

**आपणिकः** कथं तेन भवदुपचारः कृतः ?

**जनः** यदाऽहं तं पादेन प्रहृतवांस्तदा सोऽपि मां पादेनोच्चैः प्रतिप्रहृतवान् !!

◈

**कारयानचालकः** (न्यायाधीशं) महोदय ! अहं सुरां पीतवान् नाऽऽसम् ।
अहं तु तां पिबन्नासम् ।

**न्यायाधीशः** अहो ! एवं वा ? तर्ह्यहं भवते मासस्य कारादण्डं नैव दास्ये, अहं केवलं त्रिंशतो दिनानामेव दण्डं दास्ये !!

⟐

**प्राघूर्णकः** केयं महिला येदृशेन कर्कशस्वरेण गायति ?

**गृहस्वामी** इयमस्ति मे धर्मपत्नी ।

**प्राघूर्णकः** क्षम्यतां कृपया । नैष दोषस्तस्याः स्वरस्य । सा यद् गीतं गायन्त्यस्ति तन्न शोभनम् । न जाने केन दुर्विदग्धेन लिखितं ननु तत् !

**गृहस्वामी** मया किल, भोः !

⟐

(लण्डन-महानगरे बर्नार्ड शॉमहोदयस्य एकस्मिन् कार्यक्रमे —)

**महिला** शॉमहोदय ! कृपया कथयतु, किं मे वयः ?

(सौन्दर्यप्रसाधनैः समाकीर्णां तां निरीक्ष्य)

**बर्नार्ड शॉ** सुन्दराणां दन्तानामपेक्षया भवत्या वयोऽष्टादश वर्षाणि भासते, कुन्तलाकीर्णः केशपाशस्तु भवत्या वय ऊनविंशतिं वर्षाणि कथयति, तथा, भवत्याश्चित्ताकर्षकेण व्यवहारेण तु भवती चतुर्दशवर्षदेशीया प्रतिभाति ।

**महिला** (सानन्दं) भवतोऽभिप्रायार्थं भूयांसमाभारं मन्ये । किन्तु कृपया सत्यं वदतु, किंवयस्काऽहं प्रतिभामि भवते ?

**बर्नार्डशॉ** (सस्मितं) मया कथितमेव ननु ! अष्टादश एकोनविंशतिश्चतुर्दश चेति त्रयाणामपि सङ्कलनं करोतु !!

⟐

प्राकृतविभागः
कथा

# पाइयविन्नाणकहा

**आ.श्रीविजयकस्तूरसूरिः**

## (१) अज्जबालगस्स कहा

**सज्जणो जीवियंते वि, ससहावं न मुंचइ ।**
**अज्जबालग-विंछूणं, दिट्ठंतो एत्थ वुच्चइ ॥१॥**

एगो अज्जबालगो विहरमाणो नईतडे गओ । तत्थ नईजले पडिअं विंछुअं मरंतं दट्ठूणं तस्स हियये करुणा जाया । जओ बालत्तणे वि अंबाइ सो अज्जबालगो अहिंसाए सुत्ताइं पाढिओ जहा – ''विरमेहि पाणाइवायाओ हे पुत्त ! विरमेहि मुसावायाओ हे पुत्त !'' इच्चाई । तओ अच्चंतकारुणिओ सो जले पडिअं विंछुं निक्कासणाए हत्थेण गिण्हइ । तया सो जाइसहावओ तं डसिऊण जले पडिओ । बीयवारं पि तं जलाओ निस्सारिउं जएइ, तया वि सो बालको डसिओ । तप्पीडं अगणिंतो तइयवारं पि तं निक्कासिउं उज्जमेइ, तयावि सो दट्ठो, तह वि चउत्थवारं सिग्घं तं जलाओ नीसारेइ ।

तया तत्थ एगो रयगो वत्थाइं धुवंतो अहेसि । तं तारिसं दट्ठूणं कहेइ – ''मुरुक्ख ! जयंमि तुम्हारिसा जणा कई संति ?, जेण एयारिसतुच्छविसमइअजंतुद्धरणत्थं तुमं उज्जमेसि'' । अज्जबालगो आह – 'तुमं ममं मुक्खं कहेसि, तत्तओ नाऽहं मुरुक्खो, जओ खुद्दो वि विंछुओ मरणंते वि नियजाइसहावं न मुंचेज्जा, तयाऽहं मणूसोऽवि होइऊण मम परदुक्खविणासरूवं उत्तमसहावं कहं चएमि ?'' ।

एवं उत्तमपुरिसा मरणंते वि नियउत्तमसहावं न मुंचंति । उवएसो –

**अज्जबालगदिट्ठंतं, परदुक्खविणासणे ।**
**सोच्चा 'भवेह तुम्हे वि, तह कारुण्णपेसला'' ॥२॥**

परदुक्खविणासणे अज्जबालगस्स
कहा समत्ता ।

**– सूरीसरमुहाओ**

## (२) सडियधण्णदाणंमि दाणसीलसेट्ठिस्स कहा

**जारिसं दिज्जए दाणं, तारिसं लब्भए फलं ।**
**सडियण्णपयाणंमि, सेट्ठिणो एत्थ णायगं ॥१॥**

कम्मि वि नयरे एगो दाणसीलो सेट्ठिवरो आसि । सो सया विवेगरहियत्तणेण दाणंमि दीणाण सडिये कुहिये च जवे देइ । जणा जाणंता वि सेट्ठिस्स पच्चक्खं न कहिंति । कयाइ सेट्ठिणा निअपुत्तो परिणाविओ । घरंमि पुत्तवहू समागया । सा ससुरस्स एआरिसं दाणं दट्ठूणं चिंतेइ – ''मम ससुरो उदारो दाणी वि अत्थि, परंतु परमत्थविआरणासुन्नत्तणेण सडिअं कुहिअं च धन्नं दीणाणं देइ, तं च अजुत्तं, तत्तो कहं पि बोहेयव्वो'' । एगया तीए तं सडियं जवधन्नं पीसिऊण लोट्टं काऊण सूवगारस्स रोट्टगकरणत्थं अप्पिअं, कहियं च – ''जया ससुरो भोयणत्थं आगच्छेज्जा, तया तस्स तुमए एसो जवधण्णनिप्फण्णो रोट्टगो दायव्वो, जइ पुच्छइ तया मम नामं कहियव्वं'' ।

सूवकारो वि जया सेट्ठी भोयणत्थे उवविट्ठो, तया तं चिअ रोट्टगं परिवेसेइ । सेट्ठी भोयणे तं पासिऊण सूवगारं पुच्छइ – ''किमत्थं अज्ज मम एसो तुच्छो निस्साओ रोट्टगो दिन्नो ?'' सो कहेइ – ''हं न जाणामि, तुम्हाण पुत्तवहू जाणेइ'' । सेट्ठिणा सा बोल्लाविआ, पुट्ठं च किमेयं दिण्णं ?'' । सा कहेइ – ''हे ससुर ! जारिसं दाणं दिज्जइ, तारिसं चिअ भवंतरे लब्भइ, जओ तुम्हे वि सडियं तुच्छं जवधन्नं देह, भवंतरे तं चिअ लहिहित्था । तओ अहुणा एयस्स नीरसतुच्छसडियजवधन्नस्स अब्भासं न करिस्सह, तया परलोगपवन्नस्स तुम्ह एरिसमन्नं कहं रोइहिइ त्ति मए दिज्जइ'' । एवं सेट्ठिवरो पुत्तवहूए हियगरं सरहस्सं सुवयणं सोच्चा, चित्तचमक्किओ तं पसंसिऊण तओ दिणाओ आरब्भ दाणे दीणाणं सेट्ठयरं धन्नं देइ ॥ उवएसो –

**दाणसीलस्स सेट्ठिस्स, सुणित्ता चरियं इमं ।**
**दाणं भे तारिसं देज्जा, परत्थेह सुहं जहा ॥२॥**

सडियधण्णदाणंमि दाणसीलसेट्ठिस्स
कहा समत्ता ॥

**– सूरीसरमुहाओ**

## (३) किवणसेट्ठिस्स कहा

**किवणा धणिणो केई, दिज्जा दव्वं कया वि नो ।**
**कुज्जा गालिपयाणं तु, जह पुत्तस्स सेट्ठिणो ॥१॥**

कम्मि वि नयरे एगो सेट्ठिपुत्तो वरिवट्टइ । भवियव्वयाजोगेण सो अईव निद्धणो जाओ । उत्तम-कुलुप्पन्नत्तणेण कस्स वि पासे किंपि न मग्गेइ, तओ तस्स पुत्ता वि पुण्णभोयणापत्तीए दुहिआ हुंति । तया पुत्तदुक्खेण दुहिआ भज्जा कहेइ – "हे सामि ! एए पुत्ता भोयणाभावेण मरिस्संति, तुम्हाणं पुत्तदुक्खं पासिऊण किं दया नागच्छइ ? अओ पुत्ताणमुवरि अणुकंपं काऊण कस्स वि पासे गंतूण, किंपि आणेऊण पुत्ते पालेह, अन्नहा ते मरिस्संति, तेसिं हच्चाजायपावं पि तुम्हाणं लग्गिस्सइ" । सो भज्जं कहेइ – "अज्जजाव मए कस्स वि पासे न मग्गिअं, अहुणाहं कत्थ गच्छामि ?, कं पत्थेमि ?" । भज्जा आह – "तुम्हे पिउमित्तसिट्ठिघरे गच्छिज्जाह, सो अवस्सं किंपि दाहिइ" । भज्जाए अईवग्गहेण सो नियपिउमित्तसेट्ठिस्स घरे गओ, तया सो सेट्ठी आसणे उववेसिअ आयव्वयनामाइं लिहंतो अत्थि, तं नमित्ता अग्गओ सो उवविट्ठो । "एसो धणहीणो संजाओ, तेण किंपि मग्गिउं आगओ, अओ मउणं चिअ सेयं" ति चिंतिऊण सेट्ठी लिहणपरो चिट्ठइ, तेण य सह वत्तालावं पि न करेइ । सेट्ठिपुत्तो चिंतेइ – "अहुणा एसो कज्जाउलो अत्थि, कज्जसमत्तीए मं पुच्छिहिइ"त्ति चिंतिऊण तत्थ च्चिअ उववसिइ । एवं जामद्धे गए सेट्ठिणा चिंतिअं – "एसो न गमिहिइ, कं पि उवायं करोमि" ।

उवलद्धबुद्धी सो आसणे सुविऊण आसीसपायं अप्पाणं वत्थेण आवरिऊण संठिओ । तया सो सेट्ठिपुत्तो चिंतेइ – "एसो अईव संतो अत्थि, तेण सुत्तो, तओ हं इमस्स पायसंवाहणं करेमि" । तओ सो सेट्ठिस्स पायसंवाहणं करेइ । सेट्ठिणा तया नायं – "मम किंकरो संवाहणं कुणेइ" । तया कम्मकरं समुद्दिसिअ सेट्ठी पुच्छेइ – 'एसा बला किं गया ?' । तं सुणित्ता सेट्ठिपुत्तो चिंतेइ – 'एसो किंपि न पुच्छइ, धणं पि न देइ, गालिं तु देइ, तओ अस्स पच्चुत्तरं पि सम्मं दायव्वं'ति चिंतिऊण सेट्ठिपुत्तो कहेइ – "एसा बला न गया, किंतु तुम्ह गले वग्गिआ, गहणं विना न गच्छेज्जा" । एवं सोच्चा सिग्घं उवविट्ठो समाणो नियकम्मगराहिवइं कहेइ – 'किंपि दाऊण एणं निस्सारय निस्सारय' त्ति । तया किंकराहिवई सेट्ठिपुत्तस्स एगं रूवगं दाऊण निक्कासेइ । सो सेट्ठिपुत्तो घरे गंतूण नियभज्जं कहेइ – "सुहंमि सहेज्जगरा जणा बहवो हुंति, दुहंमि विरल च्चिय हवंति, तेण मए सेट्ठिवराओ अवमाणसहणेण रूवगमेव लद्धं" । उवएसो –

**किविण-सेट्ठिणो नायं, सब्भावेण विवज्जिअं ।**
**नच्चा 'अणाहदीणेसु, कुणेज्जा सव्वया दयं' ॥२॥**

किवणसेट्ठिस्स
कहा सम्मत्ता ।

**– सूरीसरमुहाओ**

## (४) सिप्पकलावुड्ढीए सिप्पिपुत्तस्स कहा

**पिउणा सिक्खिओ पुत्तो, पारं जाइ कलद्धिणो[1] ।**
**वण्णिओ जइ नो होज्जा, जह सिप्पिअअंगओ ॥१॥**

अवंतीए पुरीए इंददत्तो नाम सिप्पिवरो अहेसि, सो सिप्पकलाहिं सव्वंमि जयंमि पसिद्धो होत्था। इमस्स सरिच्छो अन्नो को वि नत्थि । एयस्स पुत्तो सोमदत्तो नाम । सो पिउस्स सगासंमि सिप्पकलं सिक्खंतो कमेण पिअराओ वि अईव सिप्पकलाकुसलो जाओ । सोमदत्तो जाओ पडिमाओ निम्मवेइ, तासु तासु पिआ कंपि कंपि भुल्लं दंसेइ, कया वि सिलाहं न कुणेइ । तओ सो सुहुमदिट्ठीए सुहुमं सुहुमं सिप्पकिरियं कुणेऊण पियरं दंसेइ, पिया तत्थ वि कंपि खलणं दरिसेइ, 'तुमए सोहणयरं सिप्पं कयं' ति न कयाई तं पसंसेइ । अपसंसमाणे पिउम्मि सो चिंतेइ – 'मम पिआ मज्झ कलं कहं न पसंसेज्जा ?, तओ तारिसं उवायं करेमि, जओ पियरो मे कलं पसंसेज्ज' ।

एगया तस्स पिआ कज्जप्पसंगेण गामंतरे गओ, तयो सो सोमदत्तो सिरिगणेसस्स सुंदरयमं पडिमं काऊण, तीए हिट्ठंमि गूढं नियनामंकियचिन्हं करिऊण, तं मुत्तिं नियमित्तद्दारेण भूमीए अंतो ठवेइ । कालंतरे गामंतराओ पिआ समागओ । एगया तस्स मित्तो जणाणमग्गओ एवं कहेइ – 'अज्ज मम सुमिणो समागओ, तेण अमुगाए भूमीए पहावसालिणी गणेसस्स पडिमा अत्थि' । तया लोगेहिं सा पुढवी खणिआ, तीए पुहवीए सुंदरयमा अणुवमा गणेसस्स मुत्ती निग्गया । तद्दंसणत्थं बहवो लोगा समागया, तीए सिप्पकलं अईव पसंसिरे । तया सो इंददत्तो वि सपुत्तो तत्थ समागओ । सो गणेसपडिमं दट्ठूणं पुत्तं कहेइ – ''हे पुत्त ! एसच्चिअ सिप्पकला कहिज्जइ । केरिसी पडिमा निम्मविआ !, इमाए निम्मवगो खलु धण्णयमो सलाहणिज्जो य अत्थि । पासेसु, कत्थ वि भुल्लं [2]खुण्णं च अत्थि ? । जइ तुमं एआरिसिं पडिमं निम्मवेज्ज, तया ते सिप्पकलं पसंसेमि, नन्नहा'' ।

पुत्तो वि कहेइ – ''हे पियर ! एसा गणेसपडिमा मए चिय कया । इमाए हिट्ठंमि गुत्तं मए नामंपि लिहिअमत्थि'' । पिआवि लिहिअनामं वाइऊण खिन्नहियओ पुत्तं कहेइ – ''हे पुत्त ! अज्जदिणाओ तुं एरिसं सिप्पकलाजुत्तं सुंदरयमं पडिमं काउं कया वि न तरिस्ससि । जयाऽहं तव सिप्पकलासु भुल्लं दंसंतो तया तुमं पि सोहणयरकज्जकरणतल्लिच्छो सण्हं सण्हं सिप्पं कुणंतो आसि, तेण तव सिप्पकलावि वड्ढंती हुवीअ । अहुणा 'मम सरिच्छो नन्नो' इइ मंदूसाहेण तुम्हम्मि एआरिसी सिप्पकला न संभविहिइ'' । एवं सो सरहस्सं पिउवयणं सोच्चा पाएसु पडिऊण पिउत्तो पसंसाकरावणसरूवनिआवराहं खामेइ, परंतु सो सोमदत्तो तओ आरब्भ तारिसिं सिप्पकलं काउं असमत्थो जाओ ॥ उवएसो –

**दिट्ठंतं सिप्पिपुत्तस्स, नच्चा गुणगणप्पयं[3] ।**
**'पुज्जाणं वयणं सोच्चा पडिऊलं न चिंतह' ॥२॥**

सिप्पकलावुड्ढीए सिप्पिपुत्तस्स
कहा समत्ता ॥

**–गुज्जरभासाकहाए**

१. कलाब्धेः । २. न्यौन्यम् । ३. प्रदम् ।

## (५) परिणामसुहावहकज्जम्मि धणियपुत्तस्स कहा

**तक्काले दुक्खहेउं पि, परिणामे सुहं सुहं ।**
**अन्नाणा मण्णए दुक्खं, जहा सेट्ठिअपुत्तओ ॥१॥**

एगो धणिअपुत्तो पओजणत्थं अन्नदीवे गंतुं बंदिरं पइ चलिओ । मग्गे गच्छंतो खलिअपाओ पडिओ, तेण अईव पीडा संजाया । तओ पच्छा निवट्टिऊण कट्ठेण घरंमि समागओ समाणो चिंतेइ – ''हा ! किं जायं ?, जइ परदीवे न गच्छिस्सं, तया मम महाहाणी होस्सइ, अहुणा मम दइव्वं परंमुहमत्थि, किं काहं ?'' एवं वियारंतो दुक्खेण दिवसे नेइ ।

एगया तेण सुयं – तं पवहणं जलम्मि निबुड्डं, जंमि आरोहिऊण परदीवे गमिरो हं आसि । तया तस्स बहुआणंदो संजाओ, जओ हं खलिअपाओ तया पडिओ, तं सोहणं जायं । अन्नहा हं तंमि पवहणे गच्छेज्जा, तया ममावि केरिसी अवत्था होज्जा, हं पि जले निमग्गो सिया । एवं 'तस्स पुव्वं दुक्खं पि, पच्छा सुहजणगं संजायं' ति ॥ उवएसो –

**धणिपुत्तस्स दिट्ठंतं, परिणामसुहावहं ।**
**जाणित्ता 'पत्तकालंमि, समभावेण चिट्ठए' ॥२५॥**

परिणामसुहावहकज्जम्मि धणिअपुत्तस्स
कहा समत्ता ॥ **– गुज्जरभासाकहाए**

## (६) गयाणुगइगोवरि मयणमच्चुकाणस्स कहा

**गयाणुगइओ लोगो, परमट्ठं न चिंतइ ।**
**मयणमच्चुकाणे हि, सव्वे लोगा समागया ॥१॥**

कम्मि वि नयरे कुंभारस्स भज्जाए सह नरिंदरण्णीए सहित्तणं अहेसि । कुंभगारभज्जाए एगा गद्दही अईव वल्लहा आसि । गद्दहीए पुत्तो जायइ, किंतु सो जायमेत्तो मरइ । तेण कुंभगारभज्जा सएव झूरेइ । एगया तीए गद्दहीए पुत्तो संजाओ । सो अईव सेयरूवो[१] अत्थि । तीए तस्सुवरिं बहू नेहो अत्थि, तओ तस्स नामं मयणु त्ति दिण्णं । सा मयणं सम्मं पालेइ, एगंमि वासे जाए समाणे सो वि मयणो मच्चुं पत्तो । तया सा कुंभगारी अईव रोवइ । तीए रोवमाणीए तप्परिवारो वि रोवेइ । तंमि काले नरिंदभज्जा किंपि कारणत्थं कुंभगारीगेहे दासिं पेसेइ । सा दासी तत्थ आगया सपरिवारं च कुंभगारिं रुवंतिं दट्ठूण चिंतेइ – 'नूणं इमीए गेहे को वि मओ, तेण सव्वे रुवंति' ।

तया सा दासी सिग्घं तत्तो निस्सरिअ रण्णि कहेइ – 'तीए गिहे को वि मरिओ' । तं सोच्चा

१. श्वेत- ॥

सदासी रण्णी कुंभगारीए गेहे गच्चा, रुवंतीए तीए समीवे उवविसिऊण सा रोविउं लग्गा । नरिंदो वि तत्थ महिसीए गमणं सोच्चा सो सप्पहाणो तत्थ गओ, पच्छा सेणावई, कोट्टवालो, नयरसेट्ठी जाव पउरजणा वि गंतूण रोविउं लग्गा । 'को तत्थ मउ' त्ति केवि न पुच्छंति, सव्वे रुवमाणा संति । तइआ तत्थ एगो वइएसिगो आगओ, सो अन्नं पउरजणं पुच्छइ – 'को एत्थ मओ ?' । सो कहेइ – 'हं मित्तस्स पच्छा[1] आगओ, तेण मम मित्तो जाणेइ ।' सो मित्तं पुच्छइ, सो अन्नं दंसेइ, एवं कमेण एगेण पउरजणेणुत्तं – 'हं नयरसेट्ठिणो पच्छा आगओ' । नयरसेट्ठी कोट्टवालं, कोट्टवालो सेणावइं, सेणावई पहाणं दंसेइ । पहाणो वि कहेइ – 'नरिंदस्स पच्छा हं आगओ' । पहाणो नरिंदं पुच्छइ – 'एत्थ को मच्चुं पाविओ' । नरिंदो कहेइ – 'अहं न जाणामि, जओ हं महिसीए पच्छा आगओ'। नरिंदो महिसिं पुच्छइ – 'को एत्थ मओ' । सा वएइ – 'अहं न जाणामि, किंतु दासी जाणेइ' । तया रण्णी दासिं पुच्छइ – 'को एत्थ मच्चुं पाविओ ?' । दासी कहेइ – 'अहं न जाणामि, परंतु तव सहिं कुंभारिं रुवंतिं दट्ठूण मए उत्तं – तव सहीए गेहे को वि मओ' । तया महिसी कुंभगारिं नियसहिं पुच्छइ – 'को तव गेहे अज्ज मओ ?' । सा बोल्लेइ – 'अज्ज मम गद्दहीपुत्तो मयणो नाम बालगद्दहो मओ, बालगद्दहो एसो मम बहुवल्लहो आसि, तेणाहं रोवेमि' । एवं मयणस्स मच्चुकाणे परमत्थं अणच्चा गयाणुगइगा सव्वे आगया समाणा हसणीआ संजाया । तओ लोगुत्तमे धम्मे सद्धम्मं सम्मं जाणिऊण पयट्टिअव्वं, न गयाणुगइयत्तणेण ।

**उवएसो –**

**गद्दहमच्चुकाणंमि, पउत्तिं मोहगब्भियं**
**पासित्ता 'सुपरिक्खित्ता, कज्जं किमवि साहए' ॥२॥**

गयाणुगइगोवरि मयणमच्चुकाणस्स
कहा समत्ता ।

**– सूरीसरमुहाओ**

---

१. पश्चात् ।

प्राकृतविभागः
कथा

# विहिविलसियं

**मुनिकल्याणकीर्तिविजयः**

पव्वयपुरस्स भगदत्तो खेत्तिओ अईव परिस्समसीलो अहेसि । तस्स भज्जा वि लच्छी गिहं सम्मं चालेइ । अओ पइवरिसं तेसिं किंचि धणं रक्खिअं वट्टिज्ज । एवं च कमेण भगदत्तस्स सयं दीणाराइं रक्खियाइं जायाइं ।

एगदिणे सो संचियं धणं गणंतो आसि ताव केणइ आहूओ सो, जहा – 'भो भगदत्ता ! रेवयपुराओ ते मित्तो सुहदत्तो आगओ अत्थि । तं च बोल्लावेइ गामचउक्के' । सुहदत्तस्स नामं सुणिऊण चेव हरिसिओ भगदत्तो सव्वाइं वि दीणाराइं जुण्णे वत्थखंडे घल्लिऊण तं च वत्थखंडं समीवत्थे जुण्णे उवाणहे पक्खिविऊण चउक्कं पइ गओ ।

इओ य लच्छी गिहकज्जं कुव्वंती आसि ताव गाममेयगो तत्थ समागओ । गिहबाहिराओ चेव तेण कूइयं – 'अम्मो ! अज्ज किं पि वत्थं दायव्वं चेव । अज्ज बारस मासा जाया, भवईए मम किंचि वि दिन्नस्स । ता जइ अज्ज किंचि न देसि तो अहमेत्थ चेव उवविसिस्सं' । लच्छीए बहुं चेव बोहिओ वि सो न किंपि बुज्झइ । तओ हारिआ लच्छी गिहब्भंतरं गंतूण पासेइ । किंतु न किंपि तारिसं वत्थं पत्तं । तओ तीए तं जुण्णं उवाणहदुगं दिट्ठं । ताहे तं चेव घेत्तूणं सा बाहिं समागया मेयगं च कहेइ – 'रे ! अज्ज एयं उवाणहदुगं चेव गिण्हिउं वच्चसु । कल्ले अज्जउत्तं पुच्छित्ता किंचि वत्थं दाइस्सं' । तओ तीए ते उवाणहा तस्स उच्छंगे पक्खित्ता । सो वि ते गेण्हिऊण गामबाहिं वट्टमाणं नियगिहं गच्छंतो एक्कस्स रुक्खस्स हेट्ठा उवविट्ठो । तओ तं उवाणहदुगं जाव सम्मं निरिक्खेइ ताव तेण तं जुण्णं वत्थखंडं दिट्ठं । तओ 'किमेएण जुण्णवत्थखंडेण ममं'ति चिंतंतो तं वत्थखंडं तत्थेव पक्खिवित्ता उवाणहदुगं च नियपाएसु परिहित्ता सगिहं गओ ।

एयावया कोई खेत्तमापगो नियकज्जत्थं तओ चेव निग्गओ । तेण एयं वत्थखंडं दिट्ठं । चउरो सो मयं उंदिरं पि कत्थइ पडिअं सम्मं परिक्खेज्ज । अओ एयं वत्थखंडं गामबाहिं पडिअं विलोकित्ता तेण नियलट्ठीए जाव उक्खित्तं ताव तं अईव गुरुभारं जाणित्ता तं वत्थखंडं गहिअं नियकोसे य पक्खिअं ।

तओ इओ तओ दट्ठूण कंचि वि न पेक्खंतो झड त्ति सगिहं पत्तो । गिहब्भंतरं गंतूण जाव तेण वत्थखंडं सम्मं निरूविअं ताव तत्थ सयं दीणाराइं दिट्ठाइं । अओ सो अच्चंतं हरिसिओ जाओ । किंतु कयाइ एयस्स धणस्स सामी एत्थ आगच्छेज्ज त्ति भयाओ तेण तं वत्थखंडं बंधिऊण धन्नकोत्थलके संगोवियं सयं च केणइ कज्जेण बाहिं गओ ।

इओ य, तस्स खेत्तमापगस्स पुत्तो नियवयंसेहिं समं नाडयं पेच्छिउकामो धणं इच्छंतो तत्थ समागओ । तेण चिंतिअं जं – 'एयाओ धण्णकोत्थलगाओ जइ किंचि धण्णं गेण्हिऊण विक्केमि ता नाडयपाउग्गं धणं तु अवस्सं लहेज्ज' । अओ तेण किंचि धण्णं पोट्टलियंमि बंधेऊण गहियं । तं च दीणारसयजुत्तं वत्थखंडं पि तेण धण्णेण समं चेव पोट्टलिगाए पक्खित्तं । तओ सो पोट्टलियं गहिऊण बाहिं निग्गओ ।

एत्थ य, चउक्काओ गिहं समागओ भगदत्तो झडत्ति गिहब्भंतरं गंतूण उवाणहं पेच्छिउं आरद्धो ताव न दिट्ठं किं पि । तेण लच्छीए पुच्छियं । तीए वि 'मेयगस्स तं दत्तं'त्ति कहियं । भगदत्तस्स मुच्छा विव समागया । नीससिऊण कहेइ सो – 'मम जीवियस्स संचियं धणं गयं' । एयं सुणिऊण लच्छी वि समाउला जाया । तीए कहियं – 'सो मेयगो कया वि पारक्कं धणं न गहेइ । अओ तं चेव पुच्छउ' । भगदत्तो वि धावंतो चेव तस्स गिहं गओ । सो य करंडगाओ कयवरं समारयंतो उवविट्ठो आसि । एएण झडत्ति पुच्छियं – 'भो ! मेयगा ! तं मम गिहाओ जं उवाणहदुगं आणीअ तत्थ किंचि जुण्णं वत्थखंडं दिट्ठं न वा ?' तेणुत्तं – 'सामिय ! तत्थ अवस्सं वत्थखंडं आसि किंतु मए तं गामाओ बाहिं चेव निक्कम्मं जाणित्ता पक्खिविअं' ।

'भो ! झुट्ठं मा वएज्ज । सच्चं कहेसु तए तं वत्थखंडं कत्थ संगोवियं ? मम समग्गं पि धणं तंमि चेव आसि । सयं दीणाराइं आसि । अओ सच्चं कहेसु' ।

एयं सुणिउं मूढो जाओ मेयगो पाएहिंतो उवाणहे कड्ढिऊण पुणो पुणो विलोइयवंतो जइ एगाइं दीणारं तत्थ हवेज्ज त्ति चिंतिऊण । तओ सअंसुनयणो कहेइ – 'सामिय ! सच्चं चेव कहेमि – मए निरत्थयं जाणिऊण तत्थेव पक्खित्तं तं वत्थखंडं । दीणारविसए नाऽहं किंचि जाणामि । मं दरिद्दं मुहा मा मारेह' । तओ सो भगदत्तं तस्स रुक्खस्स हेट्ठा नेऊण, सयं कत्थोवविट्ठो आसि कत्थ य उवाणहाओ जुण्णं वत्थखंडं कड्ढेऊण पक्खिवियं ति सव्वं दरिसियवंतो । जत्थ य वत्थखंडं पक्खिवियं तत्थ ठाणे धूलीए लट्ठिचिंधं लहुओ गड्डो य दिट्ठो भगदत्तेणं । अओ तेण निच्छियं मणे जहाऽवस्सं कोई दीणारजुत्तं वत्थपोट्टलियं घेत्तूणं गओ त्ति ।

तओ मेयगं पेसिऊण तेण चिंतियं जहा – 'धणमेयं जइ वि अईव परिस्समेण संचियं मए, तह वि मे पुण्णस्स अप्पत्तणेण विणट्ठं । अओ किं कीरउ ? सव्वं विहिविलसियं अणिच्छंतेण वि सहियव्वं चेव' । एवं चिंतेंतो सो जाव गिहं गच्छेइ ताव खेत्तमापगपुत्तो धण्णपोट्टलियं घेत्तूण समागच्छंतो तस्स मग्गे मिलिओ । तेण चेव पुच्छियं भगदत्तस्स – 'भो खेत्तिआ ! धण्णमेयं किणसि ?' तेणुत्तं – 'कहं देसि' ? अणेण कहियं – 'सव्वं देमि जइ बे रूवगे देसि' । एसो कहेइ – 'बेहिं रूवगेहिं तु एत्तोऽपि

दुगुणं लब्भइ । एगं चेव रूवगं देमि' । तेणुत्तं – 'अत्थु, सड्ढं रूवगं देहि' । भगदत्तेण वि तस्स सड्ढं रूवगं दाऊण धण्णपोट्टलिया गहिआ गिहं च पत्तो । सो य खेत्तमावगपुत्तो धणं लद्धूण हरिसिओ नियवयंसेहिं सद्धिं नाडयपेच्छणत्थं नयरं गओ ।

गिहमागंतूण भगदत्तेण लच्छीए कहियं जहा – 'दीणारपोट्टलिया तु णट्ठा । तं धणं अम्ह भग्गे न हविज्ज अओ विणट्ठं' । सा कहेइ – 'परिस्समेण अज्जियं तं धणं न को वि घेत्तुं सक्केइ । जइ गेण्हइ तो वि न चिट्ठइ' । अणेण कहियं – 'सच्चं, किंतु अम्ह परिस्समेण अज्जियं धणं जो गेण्हिस्सइ सो तं पुण्णकज्जे चेव वावारिस्सइ । अओ मा चिंतं कुणसु' । तओ सो तं धण्णपोट्टलियं तीसे अप्पेंतो कहेइ – 'पेच्छ एयं उत्तिमं धण्णं सड्ढरूवगेण लद्धं । ता सुहपसंगे एएण भोयणं कायव्वं' । सा वि तं घेत्तूण जाव महंते भायणे पक्खिवइ ताव धड त्ति सा दीणारसयजुत्ता जुण्णवत्थपोट्टलिया पडिया । तओ जाव दो वि जणा विम्हएण तं विलोएंति ताव तं चेव पोट्टलियं दट्ठूण अच्चंतं हरिसिया । तओ लच्छी कहेइ – 'मए पुव्विं चेव कहियं जहा अम्ह परिस्समज्जियं धणं न कोवि घेत्तुं सक्केइ'त्ति ।

इओ य सो खेत्तमापगो सकज्जं समत्थिऊण गिहमागओ झडत्ति धण्णकोत्थलगे जाव हत्थं घल्लेइ ताव तं ऊणं दट्ठूण चमक्किओ सो सव्वं पि कोत्थलयधण्णं बाहिं पक्खिविऊण सम्मं निरूवीअ किंतु सा धणपोट्टलिया न दिट्ठा । अओ मत्थयं कुट्टेंतो सो रोविउमारद्धो । तस्स भज्जाए आगंतूण रोवणकारणं पुच्छियं । ताहे कुविएण तेण नियमत्थाणपुत्थयं तीए मत्थए ताडियं । सा वि एएण अईव कुविया तं पुत्थयं चुल्लीए पक्खिविऊण सकज्जं काउं लग्गा । सो य खेत्तमापगो रोवंतो चिट्ठइ ।

इओ य, भगदत्तो तंमि दिणे एक्कारसी त्ति कट्टु नईए ण्हाणत्थं गओ । दीणारगंठी तेण कडीए बद्धा आसि । अओ नईतडे तं गंठिं एक्कस्स महंतपत्थरस्स हेट्ठा संगोविउं उवरि नियवत्थाइं कड्ढिऊण मुक्काइं । तओ ण्हविउमारद्धो नईजले । सुइरं ण्हाइऊण सो जाव बाहिमागओ ताव अईव भुक्खिओ जाओ। अओ सिग्घं सरीरं लूहिऊण वत्थाइं च परिहित्ता तं गंठिं तत्थेव विस्सरिऊण गिहं गओ ।

ताव, तत्थेव एगो मेसपालो नियए मेसे जलं पावेउं समागओ । मेसा य जाव जलं पियंति ताव एसो तत्थेव महंतपत्थरे उवविट्ठो जस्स हेट्ठा सा गंठी संगोविआ । जाव य उवविसइ ताव तस्स गुरुभाराओ सो पत्थरो उच्छलिओ गंठी य बाहिं पडिआ । तेण मेसपालेण सा दट्ठुं गहिआ, दीणारपुण्णा जाणिऊण य नियवत्थेसु संगोविआ । तओ मेसे हक्कारिऊण झडत्ति तओ धाविओ सो चिंतेइ – 'कत्थ वि एसा गंठी संगोवियव्वा, अण्णहा जइ एयाए सामी आगओ तो मं चेव गहिस्सइ' त्ति । 'किंतु कत्थ संगोवियव्वा ? गड्ढं काउं समओ नत्थि' इय एवमाइं चिंतंतो सो बहुदूरं गओ । ताव तेणेगो कूवो दिट्ठो। तत्थ जलं अइगहीरं नत्थि त्ति निरूविऊण तेण 'कल्ले आगंतूण एयं गहिस्सामि'त्ति चिंतित्ता तंमि चेव कूवगे सा गंठी पक्खित्ता सयं च सकज्जे उज्जुओ जाओ ।

इओ य भगदत्तो फलाहारं काऊण जावऽच्छइ ताव तस्स सा गंठी सुमरिया । अओ सो सहस त्ति धाविउं नईतडे समागओ जाव तं पत्थरं निरूवेइ ताव न किंपि लद्धं । तओ अण्णे वि पत्थरा निरूविया

परं न किंचि वि दिट्ठं । अओ सव्वहा निरासो जाओ सो चिंतेइ – 'नूणं धणमेयं मम भागहेये नत्थि। अण्णहा एवं पुणोवि न विणट्ठं हवेज्ज'त्ति । तओ इओ तओ धाविऊण तेण बहुणो लोगा एयट्ठे पुच्छिया किंतु न केण वि गंठी दिट्ठा आसि अओ सव्वेहिं पि निसेहियं । भगदत्तो वि एवं कुणंतो अईव परिस्संतो जाओ । भोयणं काउं तुरंतो चेव निग्गओ आसि अओ पिवासाउलो वि जाओ । ता जलं गवेसमाणो सो तं चेव कूवं दट्ठूण झडत्ति तत्थ गओ । अह जलं पाउं भायणं किं पि न आसि तप्पासे, अओ सिरे विंटियं वत्थं चेव एगं पज्जंतं हत्थे रक्खिऊण कूवे पक्खिवियं, जेण तं जलकिलिन्नं काउं पच्छा य पवीलिउं जलं पिबेज्जा । परंतु तं वत्थं चउरंगुलेहिं चेव हस्सं आसि अओ जलतलं न छिवइ । तत्तो भगदत्तेण कूवकंठंमि किंचि नमिऊण तं पुणोवि पक्खित्तं वत्थं । एयाए वेलाए तं जले चेव पडियं । अओ तं सम्मं जलद्दं काउं भगदत्तेण इओ तओ चलावियं । एवं कुव्वंतस्स य सहस त्ति हत्थट्ठिओ पज्जंतो छुट्टिओ वत्थं च कूवे पडियं ।

तओ दइवं निंदंतो सो परिस्संतो पिवासाभिभूओ य गिहं गओ । किंचि सत्थीहूओ य रज्जुं गहिउं तं सिरवेंटणं कूवाओ निक्कासिउं पुणरवि तत्थ गओ । जओ तं थोवदिणपुव्वं चेव नवं गहियमासि । दीणाराइं तु गयाइं चेव, नवं वत्थं कहं गमेज्ज ? अओ कूवं गंतूण तेण पासं काउं रज्जू कूवंमि पक्खित्ता। सिरवेंटणं च तंमि लग्गं । किंतु जाव तं कड्ढेइ ताव तं वत्थं कूवे चेव कहिं पि विलग्गं । जइ बलेण तं कड्ढेइ तो तं फिट्टेइ । अओ रज्जुं कूवकंठंमि बंधिऊण सो सयं चेव कूवे उत्तरिओ । कूवे थोवं चेव जलं आसि । पायं ठवेंतस्स चेव भगदत्तस्स पायहेट्ठा किंपि कढिणं वत्थुं संघट्टियं । तेण चिंतियं जहा – 'कोई मंडूओ हविज्ज'त्ति । 'परं मंडूओ ईइसो कढिणो कहं हवेज्ज ?'त्ति चिंतेंतेण तेण हत्थेण तं वत्थुं बाहिं कड्ढियं । जाव य पासेइ ताव तं चेव दीणारगंठिं उवलभित्ता हिट्ठो जाओ । तओ सिरविंटणं चाऽवि कड्ढित्ता रज्जुमवलंबिऊण बाहिं निग्गओ ।

तओ गिहं गंतूण तेण लच्छीए सव्वं कहियं । तीए वि एएण अईव हिट्ठाए घयदीवो कओ, सच्चनारायणकहापढणत्थं च पुरोहियस्स निमंतेउं तुरियतुरियं गया ।

एत्थ य, सो मेसवालो अण्णंमि दिणे तंमि कूवे ओयरिऊण सव्वत्थ पेक्खीअ किंतु मयमंडूयस्स अवसेसं मोत्तूण न किंचि वि उवलहीअ । हयासो सो दइवं निंदंतो गिहं गओ । कइवयदिणाणंतरं सो भगदत्तस्स गिहं समागओ केण वि कज्जेण । ताहे संलावं कुणंतेण तेण नीससिऊण कहियं – 'खेत्तिआ ! ममं तु सव्वं पि नट्ठं । किंतु दइवे रुट्ठे अण्णं किं काउं सक्कं ?' । भगदत्तेण 'किं जायं ?' ति पुच्छिए तेण कहियं – 'समत्थजीवियस्स सव्वं पि संचियं धणं सया वि सहियं चेव गहिऊण भमंतस्स मम पिट्ठीए चोरा समावडिया । तओ तेहिंतो धणं रक्खेउं मए धावंतेणं चेव सा धणगंठी एगंमि कूवे पक्खित्ता ''कल्लं एत्थाऽऽगंतुं गहिस्सामि''त्ति चिंतेंतेण । किंतु जयाऽहं कूवंमि अवयरिऊण पेक्खामि ताव न किंपि उवलद्धं' । भगदत्तेण पुच्छियं – 'केवड्डुं धणं आसि ?' तेणुत्तं – 'सयं दीणाराइं' । 'कंमि कूवे पक्खित्तं आसि तए तं ?'ति भगदत्तेण पुट्ठे तेण तस्स दिसा-ठाणाइयं कहियं ।

एयं सुणित्ता भगदत्तेण चिंतियं – 'नूणं जं धणं मए कूवाओ गहियं तं एयस्स चेव हविज्ज। जओ मम दीणारगंठी तु नईतडे विणट्ठा' । तओ तेण लच्छीए सव्वं पि कहियं । तीए वि तं अणुमोइयं तओ दोहिं वि निच्छिऊण जहा – 'पारक्कं केणइ य परिस्समेण अज्जियं धणं अम्हाण न कप्पइ'त्ति सा दीणारगंठी तस्स मेसवालस्स समप्पिया कहियं च – 'एसा सा गंठी मम तंमि चेव कूवे उवलद्धा' । तं दट्ठुं गहिउं च सो मेसवालो अईव हिट्ठो पुणो पुणो ते दो वि पणमिऊण सगिहं गओ ।

'एत्तिएण धणेण मम समग्गं पि जीवणं जाव सुहेण निवाहो हवेज्ज, किंतु जइ कज्जं न करेमि तो जणाणाऽऽसंका होज्ज'त्ति चिंतेउं सो मेसे चेव चारेइ पइदिणं । दीणाराइं च एगाए पोल्लाए वंसलट्ठीए भरिऊण पासट्ठियं चेव तं लट्ठिं रक्खेइ । एवं चेव दो मासा ववगया ।

अह वरिसायालो समागओ । पढमेण चेव वरिसणेण नई जलपुण्णा संजाया । ताहे मेसाण जलं पावेउं नईतडे सो मेसवालो समाणीअ । मेसा वि अहमहियाए जलं पाउं धाविया । ताहे ते निवारेउं अणेण जाव लट्ठी उल्लंबिया ताव सा हत्थाओ छुट्टिऊण जलपवाहंमि पडिया । पवाहवेगो अहिययरो आसि, जलं पि गहणं आसि । जइ तं लंट्ठिं गहेउं एसो जले पडेज्ज तो मेसे को रक्खेज्ज ? तहा जीवियभयं पि आसि चेव । अओ नियभग्गं कोसंतो सो तत्थेव रोवंतो ठिओ ।

तंमि चेव दिणे भगदत्तस्स वि केणइ कज्जेण नयरंमि गंतव्वं आसि । तो सो वि नईतडे चेव ठिओ 'जलपवाहवेगो जइ मंदो होज्ज तो उत्तरेमि'त्ति चिंतंतो । ताव तेण समीवे चेव सा लट्ठी दिट्ठा। सुंदरं लट्ठिं दट्ठुं तग्गहणलालसो सो झड त्ति नईए उत्तरिऊण तं गहिउं पुणो वि तडंमि समागओ ।

तओ तं सुंदरं दट्ठुं हिट्ठो सो 'अज्ज वि पवाहवेगो अहिगो । ता जाव एसो मंदो हवइ ताव लट्ठिमेयं गिहे मोत्तुं पुणो वि आगच्छामि'त्ति चिंतिउं सो गिहं गओ । लच्छी य ताहे कस्स वि पाडिवेसिअस्स गिहं गया आसि अओ गिहकवाडं संवुडं आसि । गिहंगणे य दो सुणगा जुज्झंता आसि । एयं दट्ठूण ताण बीहावणत्थं भगदत्तेण लट्ठी उल्लंबिया । किंतु सा थंभे थड त्ति घट्टिऊण भग्गा दुहा जाया । तत्तो य खण-खण-खण त्ति दीणाराइं पडियाइं । भगदत्तो अईव विम्हयावन्नो सव्वाइं वि दीणाराइं संचिऊण गिहब्भंतरे गओ । गणियाइं च ताणि जाव ताव सयं जायाइं । नईतडे चेव तस्स दीणारसयं विणट्ठमासि मासदुगपुव्विं, अज्ज पुण नईतडाओ चेव एयं दीणारसयं लद्धं । सो वि 'अहो विहिविलसियं !' ति चिंतिऊण तं दीणारसयं जोग्गठाणंमि मुंचीअ ।

अहऽण्णया सो चेव मेसवालो तस्स गिहमागओ । भगदत्तेण तस्स भोयणाइयं कराविअं । तओ वट्टे संलावे मेसवालेण पुव्वं पिव नीससिऊण कहिअं – 'भायरा ! मम दोहग्गं केरिसमत्थि । ममं समग्गजीवियेण संचियं धणं खणमेत्तंमि जले निमग्गं' । अणेण कहियं – 'कहं विय ?' सो कहेइ – 'सुणाहि । एक्कवारं तु मम दीणारसयं विणट्ठं तुमए उवलद्धं पुणो वि मे दिण्णं । परंतु सव्वे वि न तुम्हारिसा हवंति । एण्हिं पुण एगाए पोल्लाए वंसलट्ठीए ताइं दीणाराइं पूरिऊण लट्ठिं सव्वया मम पासे चेव रक्खंतो चिट्ठामि । तो एगया सा लट्ठी नईए पडिया कत्थवि गय त्ति न जाणेमि' ।

भगदत्तेण किंपि विचारेत्ता कहियं – 'अहं जाणामि सा कत्थ गय त्ति । परं तं जइ मम कहणं मन्नेज्ज तो कहेमि' । तेण वि धणासाए कहियं – 'भाया ! अहं तुम्ह सव्वं पि कहणं मन्निहामि, कहेउ' । एएण पुट्ठं – 'जइ एवं ता पढमं कहेसु, कहं तए एयं दीणारसयं संचियं ?' एयं सुणेत्ता सो चित्ते चमक्किओ सच्चं चेव कहीअ जहा – 'एयं दीणारसयं न ममसंतियं, एयं खु मह नईतडे पत्थरहेट्ठओ उवलद्धं' ति ।

'अज्जदिणाओ नियएण तिण्हं मासाणं सत्तण्हं च दिणाण पुव्विं एक्कारसीदिणस्स मज्झण्ह-समये नणु ?'त्ति भगदत्तेण पुच्छियं । मेसवालेण कहियं – 'सच्चं सच्चं । किंतु तुमए कहं जाणियं ?' 'तं पि नईतडस्स पच्छिमदिसाहुत्तं पव्वयपुरघट्टाओ दसाहियपयाइं दूरे ठियस्स पत्थरस्स हेट्ठा ?' इइ पुणो वि भगदत्तेण पुच्छियं । ताहे तस्स वि 'आमं-आमं...किंतु...किं तुम्हसंतियं.....'ति कहंतस्स अंसुपुण्णाइं जायाइं नयणाइं ।

'आमं, एयं महसंतियं चेव दीणारसयं । मए चेव तं तत्थ ण्हाणवेलाए पत्थरस्स हेट्ठा ठविअमासि। तं च मम पुणो वि उवलद्धं । महया परिस्समेण अज्जियं धणं सच्चं मह च्चिय आसि अओ वारं वारं विणट्ठं पि ममंतिए चेव समागयं । मए तुम्हमेयं ति चिंतिऊण दत्तं पि पुणो वि ममंतिए आगयं । ता मज्झ च्चिय एयं न तुम्हं । अओ मा मुहा सोगं कुणसु, जओ सव्वं पि विहिविलसियं चेव' ।

तओ 'एवमेयं'ति कहिउं सो मेसवालो तुण्हिक्को जाओ । कंचि वेलं ठाऊण य जाव सो निग्गच्छइ ताव लच्छीए आगंतूण कहियं – 'भायरा ! एयं सच्चनारायणकहाए समप्पियं मिट्ठन्नं गहेऊण चेव एत्तो गंतुं सक्किज्जइ' । ताहे तेण वि 'अवस्सं गेण्हामि । परंतु तत्तो ममं पि गिहंमि सच्चनारायण-कहापाढणकाले तुम्हेहिमवस्समागंतव्वं' । लच्छीए वि 'अवस्सं आगमिस्सामो'त्ति कहित्ता मिट्ठन्नं दिन्नं।

तओ जाहे सो निग्गओ ताहे भगदत्तेण कहियं – 'भो भाया ! कत्तियसुद्धेक्कारसीए तुमए एत्थ आगंतव्वं ति मन्नेसु मम वयणं' । 'किं अत्थि तद्दिणे ?'त्ति अणेण पुच्छिए तेण कहियं – 'एयं धणं अईव चंचलं । ता एयं थिरीकाउं चिंतेमि' । 'एयं खु कहं थिरीहवेज्ज ?' मेसवालेण पुट्ठं । 'थिरीकरणोवाओ मए सच्चविओ । जइ वि एत्थ खणभंगुरंमि संसारे नत्थि किंपि थिरं तह वि एयस्स धणस्स विणिओगेण गाममज्झे एगा साला बालाण पढणत्थं निम्मावेमि त्ति चिंतियं अत्थि । जओ अम्ह गामंमि साला चेव नत्थि'त्ति भगदत्तेणुत्तं ।

एयं सुणिऊण अईव आणंदिओ सो मेसवालो कहीअ – 'किंतु ममाऽऽगमणेण किं भे पओयणं ?' 'अरे ! तंमि दिणे सव्वेसिं बालगाणं तुम्ह हत्थेण चेव मिट्ठियं देस्सामो'त्ति भगदत्तेण हसंतेण कहियं। ताहे 'एवं हवउ भाया ! एवं हवउ । किंतु मिट्ठियाए सव्वं पि मुल्लं अहं चेव दाहं, ता न तए किंचि वत्तव्वं' ति भणिऊण भगदत्तमुहे हत्थो दिन्नो । तस्स पेम्मभरिअं ववहारं दट्ठूण भगदत्तो वि गग्गओ जाओ मेसवालं च समालिंगिओ । ताहे लच्छीए वि गिहब्भंतराओ महुरसरेण कहियं – 'पुणो वि अवस्सं आगच्छेज्ज'त्ति ।

(गुज्जरमूलं-रमणलाल सोनी)